(2) The final consonant of the stem follows the rules of consonant-sandhi before case-endings beginning with a consonant.

(3) Neuter nouns in the nom., acc. and voc. plural insert a nasal before the case-ending इ of the nom., accus. and voc. plural.

76. Declension of मरुत् *m.* (wind) and वाच् *f.* (rpeech) :

	S.	D.	P.	S.	D.	P.
Nom.	मरुत्	मरुतौ	मरुतः	वाक्	वाचौ	वाचः
Acc.	मरुतम्	मरुतौ	मरुतः	वाचम्	वाचौ	वाचः
Instr.	मरुता	मरुद्भ्याम्	मरुद्भिः	वाचा	वाग्भ्याम्	वाग्भिः
Dat.	मरुते	मरुद्भ्याम्	मरुद्भ्यः	वाचे	वाग्भ्याम्	वाग्भ्यः
Ab .	मरुतः	मरुद्भ्याम्	मरुद्भ्यः	वाचः	वाग्भ्याम्	वाग्भ्यः
Gen.	मरुतः	मरुतोः	मरुताम्	वाचः	वाचोः	वाचाम्
Loc.	मरुति	मरुतोः	मरुत्सु	वाचि	वाचोः	वाक्षु
Voc.	मरुत्	मरुतौ	मरुतः	वाक्	वाचौ	वाचः

Declension of जगत् *n.* (world) :

Nom., Acc., : जगत्, जगती, जगन्ति

The rest like मरुत्

EXERCISE 15

I. Vocabulary

जलमुच् (जलमुक्) *m.* cloud
ऋच् (ऋक्) *f.* hymn
त्वच् (त्वक्) *f.* skin
वाच् (वाक्) *f.* speech
शुच् (शुक्) *f.* grief
वणिज् (वणिक्) *m.* merchant
भिषज् (भिषक्) *m.* doctor
ऋत्विज् (ऋत्विक्) *m.* priest
सम्राज् (सम्राट्) *m.* emperor
परिव्राज् (परिव्राट्) *m.* mendicant

स्रज् (स्रक्) *f.* garland
मरुत् *m.* wind
भूभृत् *m,* king
विद्युत् *f.* lightning
तडित् *f.* lightning
सरित् *f.* river
सुहृद् (सुहृत्) *m.* friend
उद्भिद् (उद्भित्) *m.* plant
आपद् (आपत्) *f.* adversity
विपद् (विपत्) *f.* danger
सम्पद् (सम्पत्) *f.* wealth
परिषद् (परिषत्) *f.* assembly
शरद् (शरत्) *f.* autumn
क्षुध् (क्षुत्) *f.* hunger

समिध् (समित्) *f.* fuel
प्रावृष् (प्रावृट्) *f.* rainy season
दिश् (दिक्) *f.* direction
असृज् (असृक्) *n.* blood
चन्द्रमस् (चन्द्रमाः) *m.* moon
वेधस् (वेधाः *m.*) creator
पयस् (पयः) *n.* water, milk
उरस् (उरः) *n.* breast
चेतस् (चेतः) *n.* mind
मनस् (मनः) *n.* mind
यशस् (यशः) *n.* fame
वयस् (वयः) *n.* age

II. Join the Sandhis in the following :

समित् आसीत्। अनयत् भारम्। एतद् तृणम्। युष्माभिः रक्ष्यताम्। दिक् गजः। प्रावृट् आगच्छति। ह्यः अत्यजत् भ्रातरम्। सपदि अपश्यत् दुहितरम्। सम्राट् गजम् दण्डेन अताडयत्। तस्मात् ग्रामात् बहवः जनाः फलानि आनयन्ति। तस्मै अदीयेताम् अश्वौ। वणिक् लभते इन्धनम्। वणिजौ लभेते इन्धनम्।

III. Decline the following : भूभृत्, विद्युत् and असृज्।

IV. Translate the following into English after breaking up the sandhis :

(१) मरुत्ताकम्पन्त तरवः। (२) विद्युद् मेघेषु प्रकाशते। (३) राज्ञी भूभृति श्लिष्यति। (४) जनैर्भूभृते शेतावश्वावदीयेताम्। (५) सरितामम्बून्युदधौ वहन्ति (flow)। (६) अस्माकमुद्याने श्वेतानि रक्तानि पीतानि च कुसुमानि सन्ति। (७) अमूभिर्नारीभी रहसि कथा उच्यन्ते। (८) सहसा कृष्णा मेघास्तडिताविध्यन्त। (९) वृथावाभ्यां दुःखानि सह्यन्ते। (१०) सुप्तस्य शिशोश्चारु मुखमीक्षध्वम्। (११) सपदि प्रासादं धाव, नृपो हि त्वामाह्वयति। (१२) युष्मद् दरिद्रा नरा धनं लभन्ताम्। (१३) असौ मुनिः सकृदागच्छत्। (१४) जलस्य बिन्दुभी रवे रश्मिभिश्चैव वनस्स कुसुमानां शोभा वर्धते। (१५) लोभेन मतिश्चलति विमूढायां मर्त्या दुःखानि प्रविशन्ति। (१६) गानं गीयतां युष्माभिः। (१७) कमलानां जलं विना यथा सौन्दर्यं नश्यति दरिद्राणामाशां विनैवं शनैर्लज्जा वर्धते।

V. Translate the following into Sanskrit :

(1) The thieves were seized by the husband. (2) The lightning plays among the black clouds. (3) We dived into the cool water of the river. (4) The leaves are taken away by the wind. (5) You two go at once to the forest, for your brother is there and calls you. (6) In day-time you do not work ; at night you sit down in the garden and sing. (7) The king rose suddenly and departed from the palace. (8) Why (किम्) should you grieve ? (9) Friends sit around you, brothers and sisters are full of affection for you. (10) Should you be abused by that rogue, remain silent : charcoal blackens the hand only if it is touched. (11) O friend, you came once only to our house and you were never seen again. (12) Sick and wretched, the king's messenger was bound and led to the forest.

LESSON 16

NOUNS WITH ONE STEM (*cont.*)

77. The **main varieties** of nouns with one stem are :

(1) **Nouns with stem ending in palatals**

Final च् is changed to क् in the nom. sing. and loc. plural
to ग् before भ्याम्, भिः and भ्यः

Final ज् is changed to क् and, at times, to ट् in the nom. sing. and loc. plur.

to ग् and, at times, to ड before भ्याम्, भि. and भ्यः

Final श् is changed to क् or ट् in the nom. sing. and loc. plur.
to ग् or ड् before भ्याम्, भिः and भ्यः

	Nom. sing.	Instr. sing.	Instr. plur.	Loc. plur.
वाच् *f.* (speech)	वाक्	वाचा	वाग्भिः	वाक्षु
वणिज् *m.* (merchant)	वणिक्	वणिजा	वणिग्भिः	वणिक्षु
सम्राज् *m.* (emperor)	सम्राट्	सम्राजा	सम्राड्भिः	सम्राट्सु
दिश् *f.* (direction)	दिक्	दिशा	दिग्भिः	दिक्षु
विश् *m.* (settler)	विक्	विशा	विड्भिः	विट्सु

(2) **Nouns with stem ending in cerebrals**

Final ष् is changed to ट् in the nom. sing. and loc. plur.
to ड् before भ्याम्, भिः and भ्यः

	Nom. sing.	Instr. sing.	Instr. plur.	Loc. plur.
प्रावृष् *f.* (monsoon)	प्रावृट्	प्रावृषा	प्रावृड्भिः	प्रावृट्सु

(3) **Nouns with stem ending in dentals**

A final dental except न् is changed to त् in the nom. sing. and loc. plur.

to द् before भ्याम्, भिः and भ्यः

	Nom. sing.	Instr. sing.	Instr. plur.	Loc. plur.
सरित् *f.* (river)	सरित्	सरिता	सरिद्भिः	सरित्सु
उद्भिद् *m.* (plant)	उद्भित्	उद्भिदा	उद्भिद्भिः	उद्भित्सु
समिध् *f.* (fuel)	समित्	समिधा	समिद्भिः	समित्सु

(4) **Nouns with stem ending in labials**

A final labial is changed to प् in the nom. sing. and loc. plur. to ब् before भ्याम्, भिः and भ्यः

	Nom. sing.	Instr. sing.	Instr. plur.	Loc. plur.
ककुभ् *f.* (region)	ककुप्	ककुभा	ककुब्भिः	ककुप्सु

(5) **Nouns with stem ending in र्**

Final र् is changed to visarga in the nom. sing.

A short vowel preceding र् is lengthened in the nom. sing. and before -भ्याम्, -भिः -भ्यः and -सु

	Nom. sing.	Instr. sing.	Instr. plur.	Loc. piur.
द्वार् *f.* (door)	द्वाः	द्वारा	द्वार्भिः	द्वार्षु
गिर् *f.* (voice)	गीः	गिरा	गीर्भिः	गीर्षु

(6) **Nouns with stem ending in स्**

Final स् becomes visarga in the nom. sing. and before भ्याम्, भिः, भ्यः and सु. That visarga follows the *sandhi* rules (*see* No. 27).

Final स् remains before case-ending beginning with vowels, being changed to ष् according to the rule given in No. 45.

The *masculine and feminine nous in* अस् lengthen the अ in the *nom. sing.*

The *neuter nouns in* अस्, इस् *and* उस् lengthen the अ, इ and उ and insert a nasal (anusvāra) in the *nom. accus. and voc. plural.*

	Nom. sing	Nom. plur.	Instr. plur.	Loc. plur.
सुमनस् *m.* (good)	सुमनाः	सुमनसः	सुमनोभिः	सुमनःसु
उषस् *f.* (dawn)	उषाः	उषसः	उषोभिः	उषःसु
यशस् *n.* (fame)	यशः	यशांसि	यशोभिः	यशःसु
हविस् *n.* (oblation)	हविः	हवींषि	हविर्भिः	हविःषु
आयुस् *n.* (life)	आयुः	आयूंषि	आयुर्भिः	आयुःषु

(7) Nouns with stem ending in ह्

Final ह् becomes क् in the nom. sing. and loc. plur.
becomes ग् before भ्याम्, भिः and भ्यः

In nouns ending with लिह्, final ह् becomes ट् and ड

In उपानह्, final ह् becomes त् and द्

	Nom. sing	Instr. sing.	Instr. plur.	Loc. plur.
मधुलिह् *m.* (bee)	मधुलिट्	मधुलिहा	मधुलिड्भिः	मधुलिट्सु
उपानह् *f.* (shoe)	उपानत्	उपानहा	उपानद्भिः	उपानत्सु
कामदुह् *f.* (cow)	कामधुक्	कामदुहा	कामधुग्भिः	कामधुक्षु

The appearance of ध् instead of द् in कामधुक् is explained by the following **sandhi :**

Rule : *When* घ्, ध्, भ् *and* ह् *lose their aspiration owing to combination with following consonants, the preceding consonant becomes aspirate, if possible.*

EXERCISE 16

I. Vocabulary

विश् (विट्) *m.* Vaiśya
ककुभ् (ककुप्) *f.* direction
द्वार् (द्वाः) *f.* door
तेजस् (तेजः) *n.* glare, energy
शिरस् (शिरः) *n.* head
तपस् (तपः) *n.* penance
सदस् (सदः) *n.* residence
हविस् (हविः) *n.* oblation
ज्योतिस् (ज्योतिः) *n.* light
प्रिय dear

गिर् (गीः) *f.* voice
पुर् (पूः) *f.* town
धुर् (धूः) *f.* yoke
द्विष् (द्विट्) *m.* enemy
आयुस् (आयुः) *n.* life
धनुस् (धनुः) *n.* bow
चक्षुस् (चक्षुः) *n.* eye
मधुलिह् (मधुलिट्) *m.* bee
उपानह् (उपानत्) *f.* shoe
विद् (विद्यते) to happen, to be

सुमनस् (सुमनाः) *m.* learned man
उषस् (उषाः) *f.* dawn
तमस् (तमः) *n.* darkness
स्थित standing
निर्गुण worthless, without quality
सत्त्वम् being, vigour
दया compassion
सम्-हृ (संहरति-ते) to withdraw
कामदुह् (कामधुक्) wish-yielding cow

II. Decline the following,

ककुभ् in the singular ; पुर् in the dual ; सदस् in the plural ; उषस् in the singular ; हविस् in the dual ; उपानह् in the plural.

III. Translate the following into English :

(१) धनुषा शत्रुषु वीराः शरान् मुञ्चन्ति। (२) रविश्च चन्द्रमाश्च लोकस्य ज्योतिषी। (३) वणिग् द्वारि स्थितेभ्यो दरिद्रेभ्यो वसु यच्छेत्। (४) ऋत्विग्भिर्हविरग्नौ क्षिप्यते। (५) पुरि युष्माकं सदो विद्यते। (६) उपानहौ करेऽकरवं हृदस्य जलं च प्राविशम्। (७) त्वं लघुं भारं शिरसि कुरु, अहं गुरुं भारं कराभ्यां वहामि। (८) चक्षुर्भ्यां पश्यन्ति जनाः। (९) विद्य तस्तेजसा मम चक्षुषी पीड्येते। (१०) हे प्रिय भ्रातस्तवायुषि सुखं भवेत्। (११) द्विषां चभूः सम्राजा पराजीयत। (१२) मृद्वा गिरा गायन्तु बालिकाः। (१३) दुर्जनस्य मनसि दया न विद्यते। (१४) उषसस्तेजसा रात्रेस्तमो नश्यति। (१५) एतस्या धेन्वाः

पयः शिशुः पिबति। (१६) आपदि च सम्पदि च साधोश्चेतः प्रसन्नमस्ति। (१७) मधु-लिड्भिः कुसुमानां रेणुर्गृह्यते। (१८) कामदुहं सेवेयाथाम्। (१९) स्वभिर्भूषयन्तु सदः। (२०) परिव्राड् ग्रामाद् ग्रामं गच्छति। (२१) व्याधिताय भगिन्या औषधं भिषजादीयत। (२२) अलं वाचा कार्यं एव सत्त्वं दृश्यते। (२३) हे प्रभो क्षुधा पीड्ये मयि दयां कुरु।

IV. Translate the following into Sanskrit:

(1) In autumn the fruits fall from the trees. (2) Around the fire the priests were standing and singing hymns. (3) May your head be adorned with flowers, your arms with a bow, your mind with compassion, your life with happiness! (4) In the assembly, the poets proclaimed the fame of the emperor. (5) Upon her breast the blood of the child killed by the enemy was seen. (6) O worthless servant, you have forgotten your master. (7) May I stand by you, O mother, in danger and adversity! (8) Due to anger, light shone in his eyes, his bow fell from his hands and his mouth quivered. (9) The sage should practise (कृ) penance for a long time, restrain his speech and guard his mind from sin. (10) Pigeons fly in the direction of the wind. (11) The learned man standing at the door was attracted by the voices of the children.

LESSON 17

PASSIVE IMPERSONAL (भावे प्रयोगः)
NOUNS WITH TWO STEMS

78. In Sanskrit, not only transitive verbs, but **intransitive** verbs also, can be conjugated in the **passive voice.** Thus, the sentence : "The horse runs" can be turned into a passive which means : "Running is being done by the horse" or "the action of running is done by the horse". That is what is called **Passive impersonal.** The verb is *always* in the 3rd pers. sing. pass.

(1) In the change from the active to the passive impersonal : the nominative of the active voice becomes an instrumental ; the verb changes from active to the **3rd pers. sing.** passive. The **tense or mood** of the active voice should be preserved.

Example : *Active voice*		*Passive impersonal*
Nom. : सरितः the rivers	←→	*Instr.* : सरिद्भिः (by the rivers)
Verb : वहन्ति flow	←→	*Verb* : उह्यते (flowing is being done)
सरितो वहन्ति ।		सरिद्भिरुह्यते ।

(2) In the change from the passive impersonal to the active voice : the instrumental of the passive impersonal becomes a nominative ; the verb changes from passive to active and **agrees in person and number** with its new subject. The **tense or mood** of the passive should be preserved.

Example : *Passive impersonal*		*Active voice*
Instr. : युष्माभिः (by you)	←→	*Nom.* : यूयम् you
Verb : उद्यते (it should be spoken)	←→	*Verb* : वदेत should speak
युष्माभिरुद्यते ।		यूयं वदेत ।

79. Nouns with two stems

The main varieties of nouns (and adjectives) with **two stems** are :

(1) nouns and adjectives with stem ending in अत्. They comprise :

(a) nouns and adjectives formed with the suffix मत् (मतुप्) and वत् (वतुप्) ।

(b) present participles active (parasmaipada) in अत् (शतृ)

(c) perfect participles active (क्वत्) in वत्

(d) adjectives of quantity : कियत्, इयत्, यावत्, एतावत्, तावत् ।

(2) nouns and adjectives with stems ending in इन्. They are formed with the suffixes इन्, विन्, and मिन् ।

(3) comparative in ईयस् (ईयसुन्) ।

80. The nouns and adjectives with two stems are declined in the masculine and neuter only. The feminine is formed independently (*see* LESSON 23).

The two stems are used as follows :

in the **masculine,** the **strong** stem is used in the **nom. sing., dual and plural,**

in the **accus. sing. and dual,**
in the **voc. sing., dual and plural,**
in the **neuter,** the **strong** stem is used in the **nom., accus. and voc. plural.** The **weak** stem is used in **all** other cases.

81. The **case-endings** are those given in No. **74.** They are shown again here below with the indication of those before which the strong stem is used.

	M.			N.		
	S.	D.	P.	S.	D.	P.
Nom.	स्	-औ	-अस्	—	-ई	-इ
Acc.	-अम्	-औ	-अस्	—	-ई	-इ
Instr.	-आ	-भ्याम्	-भिः	Like the masculine		
Dat.	-ए	-भ्याम्	-भ्यः			
Abl.	-अस्	-भ्याम्	-भ्यः			
Gen.	-अस्	-ओः	-आम्			
Loc.	-इ	-ओः	-सु			
Voc.	—	-औ	-अस्	—	-ई	इ

82. Nouns and adjectives formed with the suffixes—मत् (मतुप्) and वत् (वतुप्)

The strong stem ends in अन्त्, the weak stem ends in अत्

The nom. sing. masc. lengthens the अ into आ

धीमत् (talented)—strong stem ; धीमन्त् ; weak stem : धीमत्

	M.			N.		
	S.	D.	P.	S.	D.	P.
Nom.	धीमान्	धीमन्तौ	धीमन्तः	धीमत्	धीमती	धीमन्ति
Acc.	धीमन्तम्	धीमन्तौ	धीमतः	धीमत्	धीमती	धीमन्ति
Instr.	धीमता	धीमद्भ्याम्	धीमद्भिः	Like the masculine		
Dat.	धीमते	धीमद्भ्याम्	धीमद्भ्यः			
Abl.	धीमतः	धीमद्भ्याम्	धीमद्भ्यः			
Gen.	धीमतः	धीमतोः	धीमताम्			
Loc.	धीमति	धीमतोः	धीमत्सु			
Voc.	धीमन्	धीमन्तौ	धीमन्तः	धीमत्	धीमती	धीमन्ति

EXERCISE 17

I. Vocabulary

आयुष्मत् long-lived	हिमवत् (हिमवान्) *m.* Himālaya	स्मि (स्मयते) to smile
बलवत् strong	हनुमत् (हनुमान्) *m.* Hanumān	परि-भू (परिभवति) to overcome
भगवत् (भगवान्) *m.* God	विनोदः diversion, pastime	परि-वृत् (परिवर्तते) to turn
मतिमत् prudent	कालः time	परि-हृ (परिहरति) to avoid
धीमत् talented	व्यसनम् dissipation, need	परि-हस् (परिहसति) to laugh at
श्रीमत् rich	मूर्खः fool	परुष hard, rough
ज्ञानवत् learned	निद्रा sleep	आकुल disturbed, afflicted
धनवत् wealthy	कलहः quarrel	दीर्घ long

II. Translate the following into English :

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम।
व्यसनेन च मूर्खाणां निद्रया कलहेन च॥ (१)

(२) हे भगवन् बलवन्तं मां कुरु। (३) श्रीमन्तो धनवन्तश्च संपद्यपि सुखं न विन्दन्ति। (४) एतस्यां पुरि श्रीमतो वणिजः पुत्रोऽजायत। (५) मतिमान् मूर्खं परिहसति। (६) दीर्घात् कार्यादनन्तरमहं निद्रया पर्यभूये। (७) ऋत्विजः पुत्रो धीमतो भिषजो दुहितरं पर्यणयत्। (८) ज्ञानवान् परिव्राड् हिमवन्तमुपागच्छत्। (९) भगवानस्माकं पिता। (१०) सोऽस्मभ्यं जीवनं यच्छति विपदोऽस्मान् रक्षति सुप्तानस्मान् पालयति च। (११) अत एव तं वयं वन्देमहि। (१२) मूर्खाः परुषाणि वचनानि वदन्ति। (१३) मतिमद्भिर्मृदूनि वचनान्युच्यन्ते। (१४) हे बाला आयुष्मन्तो भवत। (१५) स बलवानस्तु, तस्य यदि विनयो न स्याद् बलेनैव किं क्रियेत? (१६) चक्रमिव परिवर्तन्ते सुखानि च दुःखानि च। (१७) अलं विनोदेन। (१८) धीमद्भिर्जनैः कार्यं न परिहियेत।

III. Change the following to the passive impersonal :

अश्वौ धावतः । मतिमन्तस्तूष्णीं तिष्ठन्तु । कमलं रोहति । वयंमगच्छाम ।

IV. Change the following to the active voice :

वृक्षैर्वेष्यते । युष्माभिः क्रीड्यताम् । ताभ्यां नारीभ्यां भाष्येत । अमुनोपाविश्यत ।

V. Translate the following into Sanskrit :

(1) Smile always, in prosperity as well as in adversity. (2) Learned men are not disturbed by the speech of the fools. (3) Around the residence of the wealthy, many poor and sick people long for happiness. (4) Through hard and long penance, the sages have crossed the ocean of misery. (5) O talented one, you should avoid the dangers of riches. (6) In sleep, the fool forgets his illusion, the learned man forgets his knowledge, the poor forgets his misery.

LESSON 18

PRESENT AND PERFECT PARTICIPLES

83. Present participle active and passive (शतृ, शनच्)

(1) Present participle active

Verbs taking **parasmaipada terminations** form their present participle active in अत्. To form it, the termination अन्ति of the 3rd pers. plur. of the present active is replaced by अत्

e.g. : नी नयन्ति — नयत् — leading
दिव् दीव्यन्ति — दीव्यत् — playing
विश् विशन्ति — विशत् — entering
चुर् चोरयन्ति — चोरयत् — stealing

In the **masculine and neuter,** the present participle parasmaipada is declined like धीमत् (*see* No. **82**), with the following modifications :

(1) the nom. sing. masc. does not lengthen the अ ;

(2) the nom., accus. and vocative **dual neuter take** the strong stem in—अन्त्, **necessarily in** the 1st, 4th and 10th conjugations, and **optionally** in the 6th conjugation.

(For the feminine *see* No. **111**)

नयत्, दीव्यत्, चोरयत्

Masc. Nom.	नयन्	नयन्तौ	नयन्तः
	दीव्यन्	दीव्यन्तौ	दीव्यन्तः
	चोरयन्	चोरयन्तौ	चोरयन्तः
Acc.	नयन्तम्	नयन्तौ	नयतः
	दीव्यन्तम्	दीव्यन्तौ	दीव्यतः
	चोरयन्तम्	चोरयन्तौ	चोरयतः
Neut. N.A.V.	नयत्	नयन्ती	नयन्ति
	दीव्यत्	दीव्यन्ती	दीव्यन्ति
	चोरयत्	चोरयन्ती	चोरयन्ति

विशत्

Masc. N.A. like नयत्

Neut. N.A.V. विशत्, विशती or विशन्ती, विशन्ति

Verbs taking **atmanepada terminations** form their present participle in **मान**. To form it, the termination ते of the 3rd pers. sing. of the present tense is replaced by **मान** :

e.g. : लभ् लभते—लभमान—obtaining

मन् मन्यते—मन्यमान—thinking

मृ म्रियते—म्रियमाण—dying

मृग् मृगयते—मृगयमाण—seeking

The **masculine** is declined like कूपः (*see* No. **11**), the **neuter,** like वनम् (*see* No. **11**)—*Masc.* : लभमानः लभमानौ लभमानाः, etc.

Neut. : लभमानम् लभमाने लभमानानि, etc.

(For the feminine, *see* No. **108**)

(2) **Present Participle passive**

All **Verbs** form their present participle passive in **मान**. To form it the termination **ते** of the 3rd pers. sing. of the present passive is replaced by **मान** :

e.g. : गम् गम्यते—गम्यमान—being gone to
दा दीयये—दीयमान—being given
कृ क्रियते—क्रियमाण—being done
स्मृ स्मर्यते—स्मर्यमाण—being remembered
चुर् चोर्यते—चोर्यमाण—being stolen

The **masculine** is declined like कूपः, the **neuter** like वनम् ।

(For the feminine, *see* No.. **108**)

84. Perfect participle passive (निष्ठा क्त)

(1) The **perfect participle passive** is formed by adding त to the verbal root :

जि-जित	स्मृ स्मृत	त्यज् त्यक्त	मुच्-मुक्त	सिच्-सिक्त
मृ-मृत	हृ-हृत	आप्-आप्त	क्षिप्-क्षिप्त	सृज्-सृष्ट
ज्ञा-ज्ञात	नी-नीत	पुष्-पुष्ट	अस्-अस्त	दिश्-दिष्ट
श्र-श्रुत	चि-चित	दीप-दीप्त	तुष्-तुष्ट	स्तु स्तुत

(2) A great number of roots insert an इ before adding त

क्रीड-क्रीडित	कुप्-कुपित	निन्द्-निन्दित	चुर्-चोरित	भक्ष्-भक्षित
जीव्-जीवित	सेव्-सेवित	कम्प्-कम्पित	गण्-गणित	भाष्-भाषित
रक्ष्-रक्षित	शिक्ष्-शिक्षित	पत्-पतित	चल्-चलित	रुद्-रुदित
लिख्-लिखित	याच्-याचित	जल्प्-जल्पित	चिन्त्-चिन्तित	रच्-रचित

(3) The following verbs lose their radical nasal before त

गम्-गत	नम्-नत	क्षण्-क्षत	मन्-मत
यम्-यत	रम्-रत	तन्-तत	हन्-हत

(4) The following verbs lengthen their radical vowel :

क्रम्-क्रान्त	दम्-दान्त	क्षम्-क्षान्त
क्लम्-क्लान्त	शम्-शान्त	श्रम्-श्रान्त

(5) The following verbs change य, र and व into इ, ऋ and उ respectively :

यज्-इष्ट	प्रच्छ्-पृष्ट	वच्-उक्त	वप्-उप्त	वह्-ऊढ
व्यध्-विद्ध	ग्रह्-गृहीत	वद्-उदित	वस्-उषित	स्वप्-सुप्त

(6) Verbs ending with the **single** aspirates ध्, भ्, or ह् change those aspirates to द्, ब् and ग् respectively while त becomes ध

युध्-युद्ध	सिध्-सिद्ध	क्षुभ्-क्षुब्ध	मुह्-मुग्ध or मूढ
रुध्-रुद्ध	लभ्-लब्ध	दह्-दग्ध	स्निह्-स्निग्ध

[*see* No. **72** (7)]

But : रुह-रूढ ; सह-सोढ ।

(7) Several roots instead of adding त add न

भिद्-भिन्न ; तॄ-तीर्ण ; पॄ-पूर्ण ; छिद्-छिन्न ; द-दीर्ण ; ली-लीन ; लू-लून ।

(8) Some verbs form their perfect participle passive irregularly :

दा-दत्त	स्था-स्थित	पा-पीत	खन्-खात	हा-हीन	पच्-पक्व
धा-हित	मा-मित	गै-गीत	जन्-जात	ह्वे-हूत	शुष्-शुष्क

The **maculine** is declined like कूपः, the **neuter** like वनम् ।

(For the feminine *see* No. **108**)

85. Perfect participle active (निष्ठा क्तवतु)

The **perfect participle active** is formed by adding वत् to the perfect participle passive, e.g. : जि-जितवत् having conquered

In the masculine and neuter it is decline like धीमत् (*see* No. **82**).

Masc. :	जितवान्	जितवन्तौ	जितवन्तः
	जितवन्तम्	जितवन्तौ	जितवतः etc.
Neut. :	जितवत्	जितवती	जितवन्ति, etc.

(For the feminine, *see* No. **111**)

EXERCISE 18

I. Vocabulary

स्ना to bathe	रुद् to cry	भिद् to break
श्रु to hear	रम् (रमते) to sport	तॄ (तरति) to cross
चि to collect	क्षण् to hurt	पॄ to fill
आप् to obtain	तन् to spread	छिद् to cut
दीप् (दीप्यते) to shine	हन् to kill	दॄ to tear
स्तु to praise	स्वप् to sleep	ली to stick, to adhere
याच् (याचते) to beg	रुध् to obstruct	लू to cut
जल्प् (जल्पति) to prattle	क्षुभ (क्षुभ्यति) to be agitated	धा to put
मा to measure	हा to abandon	शुष् (शुष्यति) to dry

II. Decline the following :

ज्ञानवत् in the masc. sing. : आयुष्मत् in the neuter plur.

III. Make the present participle active of चुर्, मन्, सू and मृ agree with the following : मित्रम्, दुर्जनयोः, नक्षत्रम् and कपिषु।

IV. Give the present participle passive of the following : अव-गम्; नि-क्षिप्; आप्, हन्, धा, पा, वच्, वह्, व्यध्, दंश्।

V. Translate the following into Sanskrit :

(1) The children abandoned by their mother roam in the forest. (2) The food begged by that poor man has not been touched. (3) The broken jar should be taken away. (4) See those fruits collected by the sage's daughters. (5) Yesterday the house was filled with guests. (6) The jewels stolen from the king's palace were thrown into the river.

VI. Give the perfect participle active of the following :

धा, हन्, लभ्; श्रु, अनु-स्मृ, रुध्, दा।

VII. Decline the following :

जितवत् in the neuter sing. अस्तवत् in the masc. plur.

LESSON 19

THE USE OF THE PARTICIPLES

86. (1) **All participles** are use like adjectives.

I saw the two trees **falling**—पतन्तौ वृक्षावपश्यम्।

Being carried away by the water, the boy died—जलेन नीयमानो बालोऽम्रियत।

To the hero **who had slain the enemy** (= having slain the enemy) flowers were given—शत्रुं हतवते वीराय पुष्पाणि अदीयन्त।

Blamed by my father I ran away from the house—पित्रा निन्दितोऽहं गृहादधावम्।

(2) **Special use of the perfect participles active and passive** (क्त क्तवत्)

The perfect participles active and passive can fulfil the function of a finite verb in the past tense. In that case, too, they are treated like **adjectives.**

e.g.: The servant brought the water—दासो जलमानयत्।
दासो जलमानीतवान्।

The water was brought by the servant दासेन जलमानीयत।
दासेन जलमानीतम्।

Change of voice

Active voice : The friends saw you—मित्राणि त्वां दृष्टवन्ति (neut. plur.).

Passive voice : You were **seen by the friends**—मित्रैस्त्वं दृष्टः (masc. sing.).

(3) The **perfect passive participle** can be used :

as an **adjective** (*see* above),

as a **finite verbe in the passive** : (कर्मणि क्तः, *see* above),

as a **finite verb in the active** (कर्तरि क्तः) in the case of intransitive verbs and of verbs meaning 'to go', 'to stand', 'to dwell', 'to climb', 'to be born', 'to awake' :

e.g. : I have arrived from the village—ग्रामादहमागतः ।
Two monkeys climbed the tree—कपी वृक्षमारूढौ ।

as an **impersonal passive** (भावे क्तः) It is then always used in the neuter singular. e.g. : मया युद्धम्—It was fought by me (=I fought). वृक्षेण पतितम् ⇒ it was fallen by the tree (=the tree fell).

in the meaning of the **present** (वर्तमाने क्तः) with verbs meaning 'to wish', 'to know', 'to worship'.

N.B.—When the past passive participle is used in the meaning of the present, the agent is **not** put in the instrumental, but in the **genitive.**

e.g. : रामस्य पूजितः—He is honoured by Rama.

87. Sandhi rules of final न् followed by a vowel or a consonant

(1) *Final* न् *preceded by a short vowel and foliowed by any vowel is doubled* :

प्रहसन् आगच्छति=प्रहसन्नागच्छति । बलिन् अजयः=बलिन्नजयः ।

(2) *Final* न्
followed by च् *or* छ् *is replaced by anusvāra and* श्
followed by ट् *or* ठ *is replaced by anusvāra and* ष्
followed by त् *or* थ् *is replaced by anusvāra and* स्

तान् च तांश्च । धीमान् टीकां पठति=धीमांष्टीकां पठति । अरीन् ताडयति=अरींस्ताडयति ।

88. Sandhi rules of dentals in contact with palatals, cerebrals and ल्

(1) *Any dental coming into contact with a palatal is changed to the corresponding palatal* : सुहृत् चलति=सुहृच्चलति । आनयत् जलम्=आनयद् जलम् [*see* No. 72(4)]=आनयज्जलम् । तत् श्रुत्वा=तच् श्रुत्वा ।

(2) *Initial* श् *preceded by any of the first four letters of a class* (*see* No. 2) *is optionally changed to* छ्—तच् श्रुत्वा *optionally becomes* तच्छ्रुत्वा ।

(3) *Any dental coming into contact with a cerebral is changed to the corresponding cerebral*—अपिबत् टाङ्कम्=अपिबट् टाङ्कम्। पुष्+त=पुष्ट।

(4) *The preceding rule does not apply when a dental is followed by* ष्—अभक्षयत् षाडवम्।

(5) *A dental followed by* ल् *is changed to* ल्; न् *followed by* ल् *is changed to nasalized* ल्—एतद् लभते=एतल्लभते। वृक्षान् लुम्पति=वृक्षाल्ँ लुम्पति।

EXERCISE 19

I. Vocabulary

वस्त्रम् garment	आहारः food	दन्तः tooth	अलम्-कृ (अलंकरोति) to adorn
मार्गः path	बिलम् hole	कृतज्ञता gratitude	परिहर्तव्य to be avoided
हारः necklace	पराक्रमः bravery	प्रभूत much, many	सानन्दम् joyfully
भोजनम् meal	अपराधः offence	भयंकर fearful	उच्चैः loudly
मूषकः mouse	जालम् net	विषण्ण dejected	

II. Translate the following into English :

पर्वतस्य समीपे वनमासीत्। तस्मिन् वने सिंहोऽवसत्। स च दिवा गिरौ सुप्तो रात्रौ वने परिभ्रमन् पशूनभक्षयत्। कदाचित् प्रभूतमाहारं चितवानयं सिंहो वृक्षस्य छायायां निद्रया परिभूतः। बहवो मूषका बिलाद् बहिरागताः सानन्दं सिंहस्य शरीरेऽनृत्यन्। तेन पीडितः सिंहः प्रबुद्धोऽभवत्। मूषकानामेकः सिंहेन गृहीतः। तेनोक्तम्—"भोः प्रभो, त्वं पशूनां सम्राट् श्रूयसे। तव पराक्रमो ज्ञातः। अहं क्षुद्रस्त्वं बलवान्। अत एव मयि दयां कुरु।" —सिंहो मूषकस्य वचनं श्रुतवांस्तं च मुक्तवान्। तदनन्तरं नरेण तस्मिन्नेव वृक्षे जालं बद्धम्। तस्मिन् जाले पतितः स सिंहः। तेनोच्चैः रुदितम्। तं श्रुतवान् मूषक आगत उक्तवान्—"हे प्रभो! अलं भयेन। अस्माज्जालादहं त्वां मुञ्चामि।" स जालं दन्तैरकृन्तत्। सिंहेनोक्तम् —"अहो मम मित्रस्य कृतज्ञता!"

III. Translate the following into Sanskrit, rendering all finite verbs by participles :

(1) Many women were killed, their bodies were torn by the lion's teeth. (2) Abundant food was given to the poor children. (3) People honoured (पूज्) by fools have always been laughed at by intelligent men. (4) The necklace fell from the bride's hands and the pearls were scattered. (5) They ate their meal and slept. (6) The victorious enemies entered the city by force. (7) The path was obstructed with fallen trees. (8) Our men crossed the river, fought like heroes and seized the leader of the enemies. (9) The place was measured, fuel was brought and the darkness suddenly shone with light. (10) You forgave my offence.

IV. Change the voice in the following :

भ्रातृभ्यां रक्षितः शिशुः। आहारो दरिद्रैर्याचितः। बहवो नरा देशं त्यक्तवन्तः । मया गीतम्। यूयं जल्पितवन्तः। भगवान् मुनिभिः स्तुतः। हरेरिषुभिर्वारौ क्षतौ। ऋत्विक् शुष्कं दार्वग्नौ क्षिप्तवान्। नृपेणोक्तम्।

V. Join the following sandhis :

आनयत् जलम्। गच्छन् त्वम् मित्रे ऐक्षथाः। पश्यन् इन्दुम्। तान चलतः अहं दृष्टवान्। एतद् च। एतान् शत्रून्। एतद् शरीरम्।

LESSON 20

NOUNS AND ADJECTIVES WITH TWO STEMS (*Cont.*). DEGREES OF COMPARISON

89. The adjectives कियत् (how much, how great), इयत् (so much, so many), यावत् तावत् (as much as, as many as) एतावत् (so much, so great) are declined in the **masculine and neuter** like धीमत् (*see* No. 82).

Masc. : कियान् कियन्तौ कियन्तः, etc.

Neut. : कियत् कियती कियन्ति, etc.

90. The adjective महत् (great) has the strong stem महान्त्

	M.			N.		
	S.	D.	P.	S.	D.	P.
Nom.	महान्	महान्तौ	महान्तः	महत्	महती	महान्ति
Voc.	महान्	महान्तौ	महान्तः	महत्	महती	महान्ति
Acc.	महान्तम्	महान्तौ	महतः	महत्	महती	महान्ति

The rest like धीमत्

91. भवत् when used as the honorific pronoun (your honour) lengthens the अ in the nom. sing. masc. : भवान्। The verb having भवान् as subject is always in the **3rd person.** Similar expressions denoting respect exist in English : Your Majesty **deserves** praise—भवान् स्तुतिमर्हति।

92. Nouns and adjectives in इन्

The **strong** stem, ending in इन्, occurs before *all* case-endings beginning with a vowel.

In the nom. sing. masc., the final न् is dropped and the preceding इ is lengthened.

In the nom. acc. and voc. neuter plural, the इ is lengthened.

The **weak** stem, ending in इ, occurs before भ्याम्, भि, भ्यः and सु. बलिन् (strong) –strong stem : बलिन्; weak stem बलि

	M.			N.		
	S.	D.	P.	S.	D.	P.
Nom.	बली	बलिनौ	बलिनः	बलि	बलिनी	बलीनि
Acc.	बलिनम्	बलिनौ	बलिनः	बलि	बलिनी	बलीनि
Instr.	बलिना	बलिभ्याम्	बलिभिः	Like the masculine		
Dat.	बलिने	बलिभ्याम्	बलिभ्यः			
Abl.	बलिनः	बलिभ्याम्	बलिभ्यः			
Gen.	बलिनः	बलिनोः	बलिनाम्			
Loc.	बलिनि	बलिनोः	बलिषु			
Voc.	बलिन्	बलिनौ	बलिनः	बलिन् or बलि	बलिनी	बलिनी

93. The Degrees of Comparison—Comparative and Superlative

(1) The **comparative** and **snperlative** of adjectives are generally formed by adding the suffixes तर and तम to the stem as it appears in the instrumental plural masculine.

Adjectives	*Instr. pl. masc.*	*Comparative*	*Superlative*
दीर्घ (long)	दीर्घः	दीर्घतर	दीर्घतम
शुचि (pure)	शुचि-भिः	शुचितर	शुचितम
धीमत् (wise)	धीमद्-भिः	धीमत्तर	धीमत्तम
धनिन् (rich)	धनि-भिः	धनितर	धनितम
विद्वस् (learned)	विद्वद्-भिः	विद्वत्तर	विद्वत्तम

(2) Adjectives denoting qualities can also form their comparative and superlative with the suffixes ईयस् and इष्ठ. Before these two suffixes are added, adjectives of more than one syllable lose their last vowel and the consonant which follows, if any. Some other changes occur which are shown in the following list :

Adjectives	*Comp.*	*Superl.*	*Adjectives*	*Comp.*	*Superl.*
दृढ (firm)	द्रढीयस्	द्रढिष्ठ	दूर (distant)	दवीयस्	दविष्ठ
मृदु (soft)	म्रदीयस्	म्रदिष्ठ	स्थूल (big)	स्थवीयस्	स्थविष्ठ
पृथु (broad)	प्रथीयस्	प्रथिष्ठ	उरु (wide)	वरीयस्	वरिष्ठ
कृश (thin)	क्रशीयस्	क्रशिष्ठ	युवन् (young)	यवीयस्	यविष्ठ
लघु (light)	लघीयस्	लघिष्ठ	क्षुद्र (small)	क्षोदीयस्	क्षोदिष्ठ
पटु (clever)	पटीयस्	पटिष्ठ	क्षिप्र (quick)	क्षेपीयस्	क्षेपिष्ठ
गुरु (heavy)	गरीयस्	गरिष्ठ	अल्प (little)	कनीयस्	कनिष्ठ
दीर्घ (long)	द्राघीयस्	द्राघीष्ठ	वृद्ध (old)	ज्यायस्	ज्येष्ठ
प्रिय (dear)	प्रेयस्	प्रेष्ठ	बहु (much)	भूयस्	भूयिष्ठ
—	श्रेयस् (better)	श्रेष्ठ (best)	बलवत् (strong)	बलीयस्	बलिष्ठ
स्थिर (steady)	स्थेयस्	स्थेष्ठ	अन्तिक (near)	नेदीयस्	नेदिष्ठ

94. In the masculine and the neuter, the comparative in तर and the superlative in तम and इष्ठ are declined like कूपः and वनम्।

In the masculine and the neuter, the comparative in ईयस् is declined as follows :

लघीयस् (lighter)—strong stem : लघीयांस् ; weak stem : लघीयस्

	M. S.	M. D.	M. P.	N. S.	N. D.	N. P.
Nom.	लघीयान्	लघीयांसौ	लघीयांसः	लघीयः	लघीयसी	लघीयांसि
Acc.	लघीयांसम्	लघीयांसौ	लघीयसः	लघीयः	लघीयसी	लघीयांसि
Instr.	लघीयसा	लघीयोभ्याम्	लघीयोभिः	Like the masculine		
Dat.	लघीयसे	लघीयोभ्याम्	लघीयोभ्यः			
Abl.	लघीयसः	लघीयोभ्याम्	लघीयोभ्यः			
Gen.	लघीयसः	लघीयसोः	लघीयसाम्			
Loc.	लघीयसि	लघीयसोः	लघीयःसु			
Voc.	लघीयन्	लघीयांसौ	लघीयांसः	लघीयः	लघीयसी	लघीयांसि

95. After a comparative, the term of comparion is put in the **ablative**, e.g. : The king was defeated by an enemy stronger **than Bhima**—भीमाद् बलीयसा शत्रुणा नृपो जितः।

After the **superlative** the **genitive** or the **locative** are used. e.g. : I gave a garland to the dearest **of my friends**—मित्राणां प्रेष्ठाय मालामयच्छम्।

Among heroes, Rama is the best—वीरेषु रामः श्रेष्ठः।

96. सर्व (all) is declined like a pronoun ;

	M.			F.		
	S.	D.	P.	S.	D.	P.
Nom.	सर्वः	सर्वौ	सर्वे	सर्वा	सर्वे	सर्वाः
Acc.	सर्वम्	सर्वौ	सर्वान्	सर्वाम्	सर्वे	सर्वाः
Instr.	सर्वेण	सर्वाभ्याम्	सर्वैः	सर्वया	सर्वाभ्याम्	सर्वाभिः
Dat.	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः	सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः
Abl.	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः	सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः
Gen.	सर्वस्य	सर्वयोः	सर्वेषाम्	सर्वस्याः	सर्वयोः	सर्वासाम्
Loc.	सर्वस्मिन्	सर्वयोः	सर्वेषु	सर्वस्याम्	सर्वयोः	सर्वासु
Voc.	सर्व	सर्वौ	सर्वे	सर्वे	सर्वे	सर्वाः

	N.		
	S.	D.	P.
Nom. Acc. Voc.	सर्वम्	सर्वे	सर्वाणि

The rest like the masculine

EXERCISE 20

I. Vocabulary

कियत् how great, how much	इयत् so much	महत् great	बलिन् strong
यावत् तावत् as much as	एतावत् so much	भवत् your honour	धनिन् rich
गुणिन् virtuous	दृढ firm	अल्प little	भीमः Bhima
ज्ञानिन् learned	पृथु broad	अन्तिक near	तृष्णा thirst
मन्त्रिन् *m.* (मन्त्री) minister	कृश thin	भोगः pleasure	जॄ (जीर्यति) to grow old, to decay
रोगिन् sick	पटु clever	भुज् to enjoy	जीवनम् life
तेजस्विन् bright	स्थिर steady	तप् (तपति) to do penance, to burn	ब्राह्मणः brahmin
स्वामिन् (स्वामी) *m.* husband, master	स्थूल big	या to go	वित्तम् money
शशिन् (शशी) *m.* moon	उरु wide	सर्व all	आ-श्रि (आश्रयति) to depend on (+acc.)
	क्षिप्र quick		विघ्नः obstacle

II. Translate the following into English :

दुर्जनः परिहर्तव्यो विद्यया भूषितोऽपि सन्।
मणिनालंकृतः सर्पः किमसौ न भयंकरः। (१)

भोगा न भुक्ता वयमेव भुक्तास्तपो न तप्तं वयमेव तप्ताः
कालो न यातो वयमेव यातास्तृष्णा न जीर्णा वयमेव जीर्णाः॥ (२)

(३) अस्माकमतिथिभ्यः कियानाहारो दीयेत? (४) यावन्तमाहारमिच्छन्ति तावान् दीयताम्। (५) इयता धनेन भवान् न तुष्यति। (६) एतस्मिन् ह्रदे मयैतावन्ति कमलानि न कदापि दृष्टानि। (७) तव ज्येष्ठो भ्राता त्वद् बलियान् किन्तु त्वं तस्मात् पटीयान्। (८) अमुष्मै बालाय लघीयांसं भारं यच्छ। (९) द्रढीयसा चेतसा यूयमीश्वरं पूजयेत। (१०) सर्वेषां गुणानां विनयः श्रेष्ठः। (११) एष बालानां यविष्ठः किन्तु बहुभ्यो ज्यायोभ्यो बालेभ्यः स धीमत्तरः। (१२) वीरेषु भीमो बलिष्ठः। (१३) रोगिणः सेवेध्वम्। (१४) शरदि चन्द्रमसो ज्योतिस्तेजस्वि। (१५) नृपतिः पटवे मन्त्रिणे न कुप्येत्।

II. Translate the following into Sanskrit :

(1) How many sick people live in this town ? (2) As many (तावत्) as (यावत्) there are healthy people. (3) Go to the nearest house. (4) The hero, steadier than a mountain, was carried by a horse faster than the wind. (5) The sage's body was thin owing to hard penance, but his face was bright. (6) The cleverest of all is not the oldest. (7) In a garden bigger than a town, virtuous ministers went by a broad path to a lake adorned by many lotuses. (8) Dejected, tired and tormented with thirst, two learned brahmins who had left (=having left) their house were seen slowly walking along the river's bank. (9) Many obstacles were overcome (crossed). (10) I play with my smaller brothers. (11) Life is sweeter than death, happiness is ligher than misery, friendship is steadier than money.

LESSON 21

NOUNS AND ADJECTIVES WITH THREE STEMS

97. The main varieties of nouns and adjectives with **three stems** are :

(1) **the reduplicated perfect participle active in** वस् which must not be confused with the perfect participle active in वत् (*see* No. 85). Both participles, however, have the same meaning : कृतवत् and चकृवस=‘having done’.

(2) **nouns ending in** अन्

(3) **adjectives of direction ending in** अच्

98. Nouns and adjectives with three stems are declined in the masculine and neuter. (For the formation of the feminine, *see* LESSON **23**).

The three stems are used as follows :

the **strong stem**: in the **nom. sing., dual and plural** } of the
in the **acc. sing. and dual** } **masculine**
in the **voc. sing., dual and plural** }
in the **nom., acc. and voc. plural** of the **neuter**

the **middle stem** : before भ्याम्, भिः, भ्यः and सु, and in the nom., acc. and voc. sing. neuter.

the **weak stem** : in the remaining cases (their case-ending begin all with vowels).

99. The **case-endings** are those given in No. **74**. They are shown again here with the indication of the various stems to be used :

	M.			N.		
	S.	D.	P	S.	D.	P.
Nom.	-स्	-औ	-अस्	—	-ई	-इ
Acc.	-अम्	-औ	-अस्	—	-ई	-इ
Instr.	-आ	-भ्याम्	-भिः	Like the masculine		
Dat.	-ए	-भ्याम्	-भ्यः			
Abl.	-अस्	-भ्याम्	-भ्यः			
Gen.	-अस	-ओः	-आम्			
Loc.	-इ	-ओः	-सु			
Voc.	—	-औ	-अस	—	-ई	-इ

100. Reduplicated perfect participles in वस्

The **strong** stem ends in वांस्

The **middle** stem ends in वत्

The **weak** stem ends in उष्. Before उष् a preceding short इ is dropped.

चकृवस् (having done)—strong stem : चकृवांस्; middle stem : चकृवत्; weak stem : चक्र + उष् = चक्रुष् [*see* Sandhi rule, No. 31 (2)].

	M.			N.		
	S.	D.	P.	S.	D.	P.
Nom.	चकृवान्	चकृवांसौ	चकृवांसः	चकृवत्	चक्रुषी	चकृवांसि
Acc.	चकृवांसम्	चकृवांसौ	चक्रुषः	चकृवत्	चक्रुषी	चकृवांसि
Instr.	चक्रुषा	चकृवद्भ्याम्	चकृवद्भिः	Like the masculine		
Dat.	चक्रुषे	चकृवद्भ्यान्	चकृवद्भ्यः			
Abl.	चक्रुषः	चकृवद्भ्नाम्	चकृवद्भ्यः			
Gen.	चक्रुषः	चक्रुषोः	चक्रुषाम्			
Loc.	चक्रुषि	चक्रुषोः	चकृवत्सु			
Voc.	चकृवन्	चकृवांसौ	चकृवांसः	चकृवत्	चक्रुषी	चकृवांसि

	Nom. sing.	*Nom. plur.*	*Instr. sing.*	*Intr. plur.*
विद्वस् (a learned man)	विद्वान्	विद्वांसः	विदुषा	विद्द्भिः
जग्मिवस् (having gone)	जग्मिवान्	जग्मिवांसः	जग्मुषा	जग्मिवद्भिः
तस्थिवस् (having stood)	तस्थिवान्	तस्थिवांसः	तस्थुषा	तस्थिवद्भिः
निनीवस् (having led)	निनीवान्	निनीवांसः	निन्युषा	निनीवद्भिः
जघ्निवस् (having killed)	जघ्निवान्	जघ्निवांसः	जघ्नुषा	जघ्निवद्भिः

e.g. : The thief was seen by the two men who had stood (= having stood) in the garden—उद्याने तस्थिवद्भ्यां नराभ्यां स्तेनो दृष्टः।

To the brother who had gone (=having gone) to Hari's house, food was given by the servant—हरेर्गृहं जग्मुषे भ्रात्रे किंकरेणान्नं दत्तम्।

LESSON 22

NOUNS AND ADJECTIVES WITH THREE STEMS (*cont.*)

101. Nouns ending in अन्

The **strong** stem ends in आन्

In the nom. sing masc., the final न् is dropped

The **middle** stem ends in अ

The **weak** stem ends in न् after dropping the preceding अ

In the loc. sing. and in the nom., acc, and voc. neuter dual, the stem may *optionally* end in अन्

Stems ending in मन् and वन् preceded by a consonant always form their weak stem in अन् and **not** in न्.

102. राजन् *m.* (king)—**strong** stem : राजान्; **middle** stem राज ; **weak** stem : राज्न्=राज्ञ्

नामन् *n.* (noun)—**strong** stem : नामान्; **middle** stem : नाम ; **weak stem** : नाम्न्

	M.			N.		
	S.	D.	P.	S.	D.	P.
Nom.	राजा	राजानौ	राजानः	नाम	नाम्नी-नामनी	नामानि
Acc.	राजानम्	राजानौ	राज्ञः	नाम	नाम्नी-नामनी	नामानि
Instr.	राज्ञा	राजभ्याम्	राजभिः	नाम्ना	नामभ्याम्	नामभिः
Dat.	राज्ञे	राजभ्याम्	राजभ्यः	नाम्ने	नामभ्याम्	नामभ्यः
Abl.	राज्ञः	राजभ्याम्	राजभ्यः	नाम्नः	नामभ्याम्	नामभ्यः
Gen.	राज्ञः	राज्ञोः	राज्ञाम्	नाम्नः	नाम्नोः	नाम्नाम्
Loc.	राज्ञि-राजनि	राज्ञोः	राजसु	नाम्नि-नामनि	नाम्नोः	नामसु
Voc.	राजन्	राजानौ	राजानः	नाम-नामन्	नाम्नी-नामनी	नामानि

103. वर्त्मन् *n.* (path)—**strong** stem : वर्त्मान्; **middle** stem : वर्त्म; **weak** stem : वर्त्मन्

कर्मन् *n.* (work)—**strong** stem : कर्मान्; **middle** stem : कर्म; **weak** stem : कर्मन्

Nom. sing.	Nom. plur.	Instr. sing.	Instr. plur.	Voc. sing.
वर्त्म	वर्त्मानि	वर्त्मना	वर्त्मभिः	वर्त्म वर्त्मन्
कर्म	कर्माणि	कर्मणा	कर्मभिः	कर्म कर्मन्

104. Adjectives of direction ending in अच्

The **strong** stem ends in अञ्च्

The **middle** stem ends in अच्

The **weak** stem ends in ईच् when अच् is preceded by य्

in ऊच् when अच् is preceded by व्

105. प्रत्यच् (backward) **strong** stem : प्रत्यञ्च्; **middle** stem : प्रत्यच्; **weak** stem : प्रतीच्

	M. S.	M. D.	M. P.	N. S.	N. D.	N. P.
Nom.	प्रत्यङ्	प्रत्यञ्चौ	प्रत्यञ्चः	प्रत्यक्	प्रतीची	प्रत्यञ्चि
Acc.	प्रत्यञ्चम्	प्रत्यञ्चौ	प्रतीचः	प्रत्यक्	प्रतीची	प्रत्यञ्चि
Instr.	प्रतीचा	प्रत्यग्भ्याम्	प्रत्यग्भिः	Like		
Dat.	प्रतीचे	प्रत्यग्भ्याम्	प्रत्यग्भ्यः			
Abl.	प्रतीचः	प्रत्यग्भ्याम्	प्रत्यग्भ्यः	the		
Gen.	प्रतीचः	प्रतीचोः	प्रतीचाम्	masculine		
Loc.	प्रतीचि	प्रतीचोः	प्रत्यक्षु			
Voc.	प्रत्यङ्	प्रत्यञ्चौ	प्रत्यञ्चः	प्रत्यक्	प्रतिची	प्रत्यञ्चि

106	Nom. sing.	Nom. plur.	Instr. sing.	Loc. plur.
न्यच् (downward)	न्यङ्-न्यक्	न्यञ्चः	नीचा	न्यक्षु
सम्यच् (right)	सम्यङ्-सम्यक्	सम्यञ्चः	समीचा	सम्यक्षु
उदच् (upward)	उदङ्-उदक्	उदञ्चः	उदीचा	उदक्षु
अन्वच् (following)	अन्वङ्-अन्वक्	अन्वञ्चः	अनूचा	अन्वक्षु
विष्वच् (pervading)	विष्वङ्-विष्वक्	विष्वञ्चः	विषूचा	विष्वक्षु

107. तिर्यच् (horizontal) has the **weak** stem तिरश्च् ।

पराच् (turned away), प्राच् (eastern) and अवाच् (southern) have only two steams : the **strong** stem is in आञ्च्, the **weak** stem in आच् ।

	Nom. sing.	Nom. plur.	Instr. sing.	Loc. plur.
तिर्यच्	तिर्यङ्-तिर्यक्	तिर्यञ्चः	तिरश्चा	तिर्यक्षु
पराच्	पराङ्-पराक्	पराञ्चः	पराचा	पराक्षु
प्राच्	प्राङ्-प्राक्	प्राञ्चः	प्राचा	प्राक्षु
अवाच्	अवाङ्-अवाक्	अवाञ्चः	अवाचा	अवाक्षु

EXERCISES 21 & 22

1. Vocabulary

Pronominal adjectives

अन्यः-अन्या-अन्यद् other

एक one

पर other

कतरः-कतरा-कतरद्
which of two

चकृवस् having done

जग्मिवस् having gone

तस्थिवस् having stood

निनीवस् having led

जघ्निवस् having killed

विद्वस् learned (man)

राजन् (राजा) *m.* king

वर्त्मन् (वर्त्म) *n.* path

महिमन् (महिमा) *m.* greatness

गरिमन् (गरिमा) *m.* heaviness

प्रेमन् (प्रेमा, प्रेम) *m. n.* love

मूर्धन् (मूर्धा) *m.* head

आत्मन् (आत्मा) *m.* self	ब्रह्मन् (ब्रह्मा, ब्रह्म) *m. n.* Brahman, the Absolute	वेश्मन् (वेश्म) *n.* house
नामन् (नाम) *n.* name	व्योमन् (व्योम) *n.* sky	लोमन् (लोम) *n.* hair
कर्मन् (कर्म) *n.* work	भस्मन् (भस्म) *n.* ashes	चर्मन् (चर्म) *n.* skin, leather
जन्मन् (जन्म) *n.* birth		छद्मन् (छद्म) *n.* disguise, fraud
प्रत्यच् western, averted	विष्वच् pervading	ज्योत्स्ना moonlight
न्यच् downward	तिर्यच् horizontal	चण्डालः outcast
सम्यच् right, proper	पराच् turned away	विषम् poison
उदच् upward	प्राच् eastern	वि-धा to perform, to lay down
अन्वच् following	अवाच् southern	वि-रम् (विरमति) to stop, to cease

II. Translate the following into English :

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः।
न हि संहरते ज्योत्स्नां चन्द्रश्चण्डालवेश्मनः॥

(२) बहुभिर्मुनिभिरात्मानो महिमा स्तुतः। (३) ब्रह्मणा जगदेतत् सृष्टम् (४) समीचा वर्त्मना जमिवद्भिर्यशोधिगम्यते। (५) अग्नेर्भस्मखहं मृताया वध्वा हारमविन्दम्। (६) विद्वांस ऋषय प्रभूतानि शास्त्राणि विहितवन्तः। (७) यावत्त्वं राजा तिष्ठसि तावदस्माकं सर्वषां सुखं भवेत्। (८) पराक्रमो राज्ञो भूषणम्। (९) एतावतः शत्रून् जघ्नुषे वीराय राजा दुर्लभे रत्ने अयच्छत्। (१०) आ जन्मनो दरिद्रो नरोऽन्येषां पुरतो लज्जया परिभूयते।

III. Decline the following :

विद्वस् in the masc., sing., मूर्धन् in the pl., अन्वच् in the neuter pl.

IV. Translate the following into Sanskrit :

(1) Your face is turned away, your mind is dejected, ashes cover your head, you have even forgotten the names of your friends. (2) From a pure sky the moonlight falls upon the path. (3) Shoes are made of (with) leather. (4) The child has drunk poison : give him (some) medicine. (5) The king and the queen rejoiced at the birth of a talented son. (6) Let the ministers defeat the western enemies by fraud or by force. (7) For the sake of others the honest man bears the heaviness of misery.

LESSON 23

THE FORMATION ON THE FEMININE

108. The general rules for the formation of the feminine of adjectives ending in vowels should be carefully revised (*see* LESSON 12).

Adjectives forming their feminine in आ are declined like लता।
Adjectives forming their feminine ई are declined like नदी।

The present participle atmanepada and the present participle passive (शानच्), the perfect participle passive (क्त), the comparative in तर and the superlative in तम and इष्ठ form their feminine in आ।

लभमान लभमाना ; जीयमान-जीयमाना ; नीत नीता ; शुचितर-शुचितरा ; शुचितम-शुचितमा ; गरिष्ठ-गरिष्ठा।

109. Some nouns and adjectives ending in अ follow special rules in forming their feminine :

(1) Nouns and adjectives ending in क form their feminine in इका—बालक-बालिका : गायक-गायिका।

(2) The following adjectives ending in अ form their feminine in ई—गौर-गौरी ; किशोर किशोरी ; तरुण-तरुणी ; सदृश सदृशी ; तादृश-तादृशी।

(3) Nouns ending in अ and denoting a class or a species form their feminine in ई—सिंह-सिंही ; व्याघ्र-व्याघ्री ; हरिण हरिणी ; हंस-हंसी ; मयूर-मयूरी, *etc.*

Exceptions—कोकिला, अश्वा, अजा, मूषिका, बलाका, चटका।

(4) Adjectives ending with the suffixes मय and तन form their feminine in ई—मृन्मय-मृन्मयी ; चिन्मय-चिन्मयी ; पुरातन-पुरातनी।

110. Adjectives ending in consonants and having *one* stem only have the same form both in the masculine and in the feminine, e.g. कामकृत् (granting desire)—कामकृत पिता ; कामकृत् कन्या।

111. Adjectives ending in consonants and having *two* stems form their feminine as follows :

(1) adjectives ending in वत् and मत्, perfect participles active in क्वस् and adjectives of quantity like कियत् etc, add ई to their **weak** stem—धीमत्-धीमती ; धनवत्-धनवती ; नीतवत् नीतवती ; कियत् कियती ।

(2) present participles active in अत् (शतृ) of the first, fourth and tenth conjugations add ई to their **strong** stem ; those of the sixth conjugation add ई **either to the strong or to the weak** stem—नयत्-नयन्ती ; पुष्यत् पुष्यन्ती ; चोरयत्-चोरयन्ती ; विशत्-विशन्ती *or* विशती (*see* the rule for the neuter dual, No. 83).

(3) भवत्, present part. active of भू forms its feminine in भवन्ती । भवत् honorific pronoun forms its feminine in भवती ।

(4) adjectives ending in इन् add ई to the **strong** stem in इन्—धनिन्-धनिनी ।

(5) comparatives in ईयस् add ई to their **weak** stem—पटीयस् पटीयसी ।

112. Nouns and adjectives ending in consonants and having *three* stems form their feminine by adding ई to their **weak** stem :

	Weak stem	*Feminine*
चक्रुवस्	चक्रुष्	चक्रुषी
विद्वस्	विदुष्	विदुषी
राजन्	राज्ञ्	राज्ञी
प्रत्यच्	प्रतीच्	प्रतीची
प्राच्	प्राच्	प्राची

113. Interrogative and Relative Pronouns

Declension of the interrogative pronoun किम् (which? what?)

	M.			F.			N.		
	S.	D.	P.	S.	D.	P.	S.	D.	P.
Nom.	कः	कौ	के	का	के	काः	किम्	के	कानि
Acc.	कम्	कौ	कान्	काम्	के	काः	किम्	के	कानि
Instr.	केन	काभ्याम्	कैः	कया	काभ्याम्	काभिः	Like		
Dat.	कस्मै	काभ्याम्	केभ्यः	कस्यै	काभ्याम्	काभ्यः			
Abl.	कस्मात्	काभ्याम्	केभ्यः	कस्याः	काभ्याम्	काभ्यः	the		
Gen.	कस्य	कयोः	केषाम्	कस्याः	कयोः	कासाम्			
Loc.	कस्मिन्	कयोः	केषु	कस्याम्	कयोः	कासु	masculine		

114. Declension of the relative pronoun यद् (which, who)

	M.			F.			N.		
	S.	D.	P.	S.	D.	P.	S.	D.	P.
Nom.	यः	यौ	ये	या	ये	याः	यत्	ये	यानि
Acc.	यम्	यौ	यान्	याम्	ये	याः	यत्	ये	यानि
Instr.	येन	याभ्याम्	यैः	यया	याभ्याम्	याभिः	Like		
Dat.	यस्मै	याभ्याम्	येभ्यः	यस्यै	याभ्याम्	याभ्यः			
Abl.	यस्मात्	याभ्याम्	येभ्यः	यस्याः	याभ्याम्	याभ्यः	the		
Gen.	यस्य	ययोः	येषाम्	यस्याः	ययोः	यासाम्			
Loc.	यस्मिन्	ययोः	येषु	यस्याम्	ययोः	यासु	masculine		

EXERCISE 23

I. Vocabulary

बालिका girl	व्याघ्र tiger	अजः goat	जरा old age
गायिकः singer	व्याघ्री tigress	बलाकः crane	रोगः disease
गायिका songstress	हरिणः dear	चटकः sparrow	अहितम् harmful deed
गौर white	हरिणी hind	मृन्मय earthen	चित्र surprising strange
किशोर adolescent	हंसी female swan	चिन्मय spiritual	परि-तर्ज् (परितर्जयति) to menace, to threaten
तरुण youthful	मयूरः peacock	चर्ममय leathern	प्र-हृ (प्रहरति) to strike
सदृश like, similar	मयूरी peahen	अम्भस् (अम्भः) *n.* water	आ-चर् (आचरति) to perform
तादृश such	कोकिल cuckoo	देहः body	
क्षमिन् forbearing	गुणग्राहिन् appreciative	पुण्यम् merit	अनुकूल favourable
दक्ष competent	अरुज healthy	सुदुर्लभ very hard to obtain	क्षयः loss, decline
स्वस्थ sound	यावत्..तावत् while	प्रयत्नः effort	दूरतः far away
इन्द्रियम् sense	कीदृश what kind of	खननम् digging	अप्रतिहत unimpaired
प्रत्युद्यमः remedy	आत्मश्रेयस् (आत्मश्रेयः) *n.* supreme good		सम्-दीप् (संदीप्यते) to burn
भवनम् house			कार्य to be done

II. Give the feminine of the following :

धावन् अश्वः। तरुणः गायकः। ज्यायान् बालकः। हतः व्याघ्रः। तादृशः कोकिलः। पीतवान् हरिणः। कियान् हंसः। तस्थिवान् अजः। गौरः किशोरः। गुणग्राही नरः। डीयमानः चटकः। दृष्टः मयूरः। चारुः बलाकः।

III. Change the voice in the following :

जलं मयूरीभिः पीतम्। स्वसा भ्रातृन् दृष्टवती। भ्राता स्वसारौ रक्षितवान्। हरिणी राज्ञा हता। तरुण्यो गायिका गानं गीतवत्यः। व्याघ्र्या रुदितम्। मात्रोक्तम्।

VI. Translate the following into English :

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती रोगाश्च शत्रव इव प्रहरन्ति देहम्।
आयुः परिस्रवति भिन्नघटादिवाम्भो लोकस्तथाप्यहितमाचरतीति चित्रम्॥ (१)

क्षमी दाता गुणग्राही स्वामी पुण्येन लभ्यते।
अनुकूलः शुचिर्दक्षः कविर्विद्वान् सुदूर्लभः॥ (२)

यावत् स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत् क्षयो नायुषः।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः॥ (३)

LESSON 24

INDECLINABLE PAST PARTICIPLE (त्वा and ल्यप्) LOCATIVE AND GENITIVE ABSOLUTE

115. The participles dealt with so far are treated like adjectives and are subject to the rules of agreement with the noun they qualify.

There exists a past participle active, also called *gerund*, which **is never declined.**

Its **formation** is as follows :

(1) verbs not preceded by a preposition form their gerund by adding त्वा (क्त्वा) to the root, in a way similar to that of the perfect

participle (*see* No. **84**) : गम्-गत-गत्वा ; पत्-पतित-पतित्वा ; लभ्-लब्ध-लब्ध्वा।

Verbs of the *tenth* conjugation, however, keep their full active base : चुर्—चोरयित्वा।

(2) verbs **preceded by a preposition** replace त्वा by य (ल्यप्) : verbs ending with consonants and *long* vowels simply and य—

परिक्षिप्-परिक्षिप्य ; अनुभू-अनुभूय ; आदा-आदाय।

verbs ending in **short** vowels add त्य instead of य—

विजि-विजित्य ; प्रतिश्रु-प्रतिश्रुत्य ; अनुकृ-अनुकृत्य।

verbs ending in न् or म् and dropping their final nasal in the perfect passive participle have two forms : आगम्-आगम्य or आगत्य ; प्रणम्-प्रणम्य or प्रणत्य ; अनुमन्-अनुमन्य or अनुमत्य [*see* No. **84** (3)]

166. Use of the indeclinable past participle

When two different actions are performed by the **same agent**, the first of the two actions is expressed by the indeclinable past participle :

e.g. : I bathed and ate (= having bathed I ate) —स्नात्वाहमभक्षयम्।

On seeing me my mother was pleased (=having seen me my mother was pleased)—मां दृष्ट्वा मातातुष्यत्।

I came, I saw, I conquered (=having come and having seen, I conquered)—आगम्य दृष्ट्वा चाहमजयम्।

When the second verb is in the **passive** voice, the indeclinable past participle refers **not** to the subject, but to the **agent** of the verb, i.e. to the noun in the instrumenral case. Thus : गृहमागम्य पित्रा निन्दितोऽहम्=On coming home my father scolded me (both the action of coming and that of scolding being performed by my father). **Hence**, if the voice is changed, the indecl. past part. remains unchanged : गृहमागम्य पिता मां निन्दितवान्।

117. Locative and Genitive absolute

An absolute phrase is a phrase containing a participle the subject of which is different from the subject of the main verb; e.g. : *The sun having set,* we went home. Every absolute phrase can be replaced by an adverb-clause.

e.g. : The boys being tired, the master stopped the class=Because the boys were tired, the master stopped the class.

The hunter having gone, the birds began to sing=After the hunter went, the birds began to sing.

Your father being there, you did not rise from your seat=Although your father was there, you did not rise from your seat.

An absolute phrase can be translated into Sanskrit by the **locative absolute**. The subject is put in the **locative case** and the participle **agrees** with it in **gender, number and case.**

The **present** participle is used if the action of the absolute **phrase is simultaneous** with that of the main **clause.**

The **past** participle is used if the action of the absolute phrase **precedes** that of the main **clause.**

The **active** or **passive** participle is used according to the voice of the participle in the absolute phrase.

118. Examples

(1) The soldiers throwing arrows (=while the soldiers were throwing arrows), the general mounted his horse :

The soldiers : loc. plur. masc.—सैनिकेषु

throwing : active participle denoting an action **simultaneous** with that of the main clause : pres. act. part. —क्षिपत्सु

arrows : acc. plur.—इषून्

सैनिकेषु इषून् क्षिपत्सु सेनापतिरश्वमारूढः ।

(2) The burden being carried by the servant (=as the burden was carried by the servant), we walked fast :

The burden : loc. sing. masc.—भारे

being carried : passive participle denoting an action **simultaneous** with that of the main clause : pres. pass. part.—उह्यमाने

by the servant : instr. sing.—किंकरेण

किंकरेणोह्यमाने भारे वयं क्षिप्रमचराम ।

(3) My brother having drunk water (=after my brother had drunk water), I read my lessons.

My brother : loc. sing. masc.— भ्रातरि

having drunk : active part. denoting an action which precedes that of the main clause : past part. act.—पीतवति

water : acc. sing.—जलम्

भ्रातरि जलं पीतवति पाठानहमपठम् ।

(4) The garland having been given (=after the garland was given), the boys sang.

The garland : loc. sing. fem.—मालायाम्

having been given : passive part. denoting an action which precedes that of the main clause : past part. pass—दत्तायाम्

मालायां दत्तायां बाला अगायन् ।

119. Genitive absolute

When the absolute phrase is equivalent to a concessive clause implying **disregard** or **contempt,** the **genitive absolute** may also be used. अपि is usually added :

e.g. : His father looking on (=although his father is looking on), the boy beats his younger brother—पितुः पश्यतोऽपि बालः कनीयांसं भ्रातरं ताडयति ।

120. When the subject of an adverb-clause is the same as that of the main clause, the use of the locative absolute remains possible if the voice of the adverb-clause can be changed :

e.g. : After he had defeated the enmies, the king started for the palace,

Change of voice : The enemies having been defeated, the king started for palace.

Loc. abs. : अरिषु जितेषु राजा प्रासादं प्रस्थितः।

121. When the absolute phrase containts the present participle of the verb 'to be,' it can be omitted in the locative absolute :

e.g. : You being my protector (=since you are my protector), I have no fear—त्वयि रक्षितरि (सति) मम भयं नास्ति।

EXERCISE 24

I. Vocabulary

आ-दा to receive	विप्रः brahmin	धूर्त rogue	प्रति-ईक्ष् (प्रतीक्षते) to wait
अनु-भू (अनुभवति) to feel, to enjoy,	कश्चित् / कश्चिद् a certain	ततः then	परि-ईक्ष् (परीक्षते) to examine
गौतमः Gautama	यज्ञः sacrifice	उपायः means	अभि-धा to address
अरण्यम् forest	क्री to buy	प्रकर्षः excellence	कुक्कुरः dog
स्कन्धः shoulder	वि-क्री to sell	तलम् base, foot	आ-कर्ण् (आकर्णयति) to hear, to listen
नि-धा to put down	छागः goat	आगमनम् coming	निःसंशयम् certainly
		साशंकम् with fear	

II. Translate the following into English :

अस्ति गौतमस्यारण्ये कश्चिद् ब्राह्मणः। स च यज्ञायान्यस्माद् ग्रामाच्छागं क्रीत्वा स्कन्धे नीतवान्। स गच्छन् धर्ताभ्यामवलोकितः। ततस्तौ धूर्तौ चिन्तितवन्तौ—"यद्येष छागः केनाप्युपायेन लभ्यते तदा मतिप्रकर्षो भवेत्" इति। ततस्तौ वृक्षयोस्तले तस्य

ब्राह्मणस्यागमनं प्रतीक्ष्य मार्गे स्थितौ। तत्रैकेन धूर्तेन गच्छन् स विप्रोऽभिहितः। "भो ब्राह्मण किं कुक्कुरः स्कन्धेनोह्यते" इति। विप्रेणोक्तम् — "नायं कुक्कुरः किन्तु यज्ञच्छागः" इति। तदनन्तरं द्वितीयेन धूर्तेन तथैवोक्तम्। तदाकर्ण्य ब्राह्मणश्छागं भूमौ निधाय परीक्ष्य च साशंकमवदत् — "मम छागः किं कुक्कुरो भवेत्" इति। प्रथमेन धूर्तेनोक्तम्—"पश्य। मा स्पृश। तीव्रैर्दन्तैस्त्वां दशेत्" इति। भयाद् विप्रे क्षिप्रं गते धूर्तौ सानन्दं छागं हृतवन्तौ।

III. Translate the following into Sanskrit, using in every sentence either the indeclinable past participle or the locative absolute :

(1) I saw the minister and spoke to him. (2) The enemies having conquered, we fled. (3) The enemies having been conquered we sang. (4) The merchant sold two cows and bought one horse. (5) While the guests were arriving, all the servants adorned the house. (6) If you are alive, I, too, am alive. (7) After blaming me, my mother consoled me. (8) While your honour was our king, our happiness always increased. (9) We all fell asleep while the teacher spoke. (10) If a lion is stronger than a jackal, you should certainly vanquish your enemy. (11) Dear friends, look at me and have pity on me. (12) When the two black horses have drunk water and eaten grass, the cows should be brought in. (13) As the baby was carried away by the thieves, the mother, overcome by sorrow, fell upon the ground. (14) Although his daughter had fallen into danger, the rogue did not stir from the house.

LESSON 25

INFINITIVE IN तुम् (तुमुन्)
THE SUBORDINATE CLAUSE

122. The **infinitive** is formed by adding तुम् to the root after guṇating a short medial vowel and a final vowel, e.g. : गम्-गन्तुम् : जि-जेतुम् ।

Many verbs insert an इ before तुम्, e.g. : भू-भवितुम् ।

Verbs of the tenth conjugation keep their present base and insert इ, e.g. : चुर-चोरयितुम् ।

Many verbs form their infinitive irregularly (*see* Verbs and their Principal Parts).

123. Use of the infinitive

(1) The infinitive is used to express the purpose of an action :

e.g. : He came to acquire knowledge—विद्यामधिगन्तुं स आगतः ।

(2) The infinitive is used with adjectives meaning 'fit', 'able', and with verbs meaning 'to wish', 'to begin', 'to be able' :

e.g. : I am unable to drink—पातुमसमर्थोऽस्मि ।

He wishes to hear the song—गीतं श्रोतुमिच्छति ।

He began to run—धावितुमारभत ।

(3) The infinitive is used with the verb अर्ह् (to deserve) in the sense of polite request, e.g. : You shoul protect me—मां रक्षितुमर्हसि ।

(4) The infinitive has **no passive** form. When the passive is to be expressed, the verb accompanying the infinitive is put in the passive :

e.g. : *Active* I begin to see the trees—वृक्षान् द्रष्टुमारभे ।

Passive : The trees begin to be seen by me—मया वृक्षा द्रष्टुमारभ्यन्ते ।

124. The Subordinate Clause

(1) The Noun-Clause

A noun-clause introduced by the **conjunction 'that'** is rendered into Sanskrit by a double accusative, e.g.: He thinks **that** Rāma is a hero (=he thinks Rāma to be a hero)—रामं वीरं चिन्तयति।

A noun-clause introduced by a **conjunctive pronoun** is equivalent to an adjective-clause, e.g.: **What** he says is true (=that which he says is true)—यद् वदति तत्सत्यम्।

Indirect speech does not exist in Sanskrit and must always be turned into direct speech. The end of the direct speech is marked by the word इति, e.g.: He told me that he had conquered the enemies (="I have conquered the enemies" so he told me) —अहं शत्रून् जितवानिति सोऽवदत्।

125. (2) Adjective-Clause

An adjective-clause is introduced by a **relative pronoun.**

The **case** of the relative pronoun depends on its own grammatical function in the adjective-clause.

The **number** and **gender** of the relative pronoun depend on the number and gender of its antecedent.

e.g.: The man to whom the book was given has gone away from the house.

Adjective-clause: **'to whom the book was given'**:
to whom: **dative case** governed by the verb 'was given'.

masc. sing., because its antecedent 'the man' is in the masc. sing—यस्मै पुस्तकं दत्तम्
यस्मै नराय पुस्तकं दत्तं स गृहाद् गतः।

126. Only the first four **numerals** are declined in the three genders :

	एक (one)			द्वि (two)		
	M.	F.	N.	M.	F.	N.
Nom.	एकः	एका	एकम्	द्वौ	द्वे	द्वे
Acc.	एकम्	एकाम्	एकम्	द्वौ	द्वे	द्वे
Instr.	एकेन	एकया	like the masc.	द्वाभ्याम्		
Dat.	एकस्मै	एकस्यै		द्वाभ्याम्		
Abl.	एकस्मात्	एकस्याः		द्वाभ्याम्		
Gen.	एकस्य	एकस्याः		द्वयोः		
Loc.	एकस्मिन्	एकस्याम्		द्वयोः		

	त्रि (three)			चतुर (four)		
	M.	F.	N.	M.	F.	N.
Nom.	त्रयः	तिस्रः	त्रीणि	चत्वारः	चतस्रः	चत्वारि
Acc.	त्रीन्	तिस्र.	त्रीणि	चतुरः	चतस्रः	चत्वारि
Instr.	त्रिभिः	तिसृभिः	Like the masc.	चतुर्भिः	चतसृभिः	Like the masc.
Dat.	त्रिभ्यः	तिसृभ्यः		चतुर्भ्यः	चतसृभ्यः	
Abl.	त्रिभ्यः	तिसृभ्यः		चतुर्भ्यः	चतसृभ्यः	
Gen.	त्रयाणाम्	तिसृणाम		चतुर्णाम्	चतसृणाम्	
Loc.	त्रिषु	तिसृषु		चतुषु	चतसृषु	

EXERCISE 25

1. Vocabulary

समर्थ able
असमर्थ unable
शक्य capable of being done
प्रशमः cessation
प्रशमं नी to check
सारथिः *m.* charioteer
अर्ह् (अर्हति) to deserve
यत् (यतते) to strive
युज्यते it is proper
खिद् (खिद्यते) to be depressed
शक् to be able
आ-रुह् (आरोहति) to mount, to climb
दोषः fault, defect
गुणवत् virtuous
गुणरागिन् lover of virtue
कलङ्कः spot, mark
व्याधिः *m.* disease
जातमात्रः hardly born
वा or
अनुरागः love
संमानय (संमानयति) to esteem, to honour
संसद् (संसत्) *f.* assembly
उत्सारणम् driving away
राजवल्लभः courtier
अतिपुष्टाङ्गयुक्त strongly built

II. Translate the following into English :

दोषमपि गुणवति जने दृष्ट्वा गुणरागिणो न खिद्यन्ते।
प्रीत्यैव शशिनि पतितं पश्यति लोकः कलङ्कमपि ॥ (१)

यं यं नृपोऽनुरागेण संमानयति संसदि।
तस्य तस्योत्सारणाय यतन्ते राजवल्लभाः ॥ (२)

जातमात्रं न यः शत्रुं व्याधिं वा प्रशमं नयेत्।
अतिपुष्टाङ्गयुक्तोऽपि स पश्चात्तेन हन्यते ॥ (३)

(४) नद्यां स्नातं वयमागताः। (५) यद् वदति मूर्खस्तद् मतिमान् श्रोतुं नेच्छति। (६) त्वयि प्रसन्ने मम किं गुणेन, त्वय्यप्रसन्ने मम किं गुणेन। (७) येषां विद्या नास्ति तेभ्यः कुप्यति गुरुः। (८) एतावद् दुःखं सोढुमसमर्थास्मीत्युक्त्वा नारी विषण्णा भूत्वा वृक्षस्य तल उपाविशत्। (९) पापं परिहर्तव्यमिति मन्यन्ते साधवः। (१०) गच्छेत्युक्तं तया।

III. Translate the following into Sanskrit :

(1) On hearing that her husband had arrived, the young wife ran to the door. (2) We should protect those for whom we feel affection. (3) It is proper to salute the master entering the house. (4) Her sweet song could not be heard. (5) Those who are able

to check their senses are like a competent charioteer. (6) Those who begin to dig a well when their house is burning are like men who take a medicine when sickness has led them to death's door. (7) O king, you should forgive (अर्ह् + inf.) my offences.

IV. Change the voice in the following :

धीमत्या गायिकया गातुमारभ्यताम् । वक्तुमुनेर्वचनानि बोद्धुमारभे ।

LESSON 26

THE ADVERB-CLAUSE

127. The adverb-clause expresses a particular circumstance of the action of the main clause. In Sanskrit, the adverb clause generally **precedes** the main clause and is introduced by a **conjunctive** adverb to which a simple adverb corresponds in the main clause' e.g. : The tree lies where it fell' will be translated into Sanskrit as "**Where** the tree fell, **there** it lies".

128. List of adverbs

	Interrogative	Conjunctive	Simple	Indefinite
TIME	कदा (when ?)	यदा (when)	तदा (then)	कदाचित् (at times)
		यावत् (while)	तावत् (—)	सर्वदा (always)
PLACE	कुत्र, क्व (where ?)	यत्र (where)	तत्र (there)	सर्वत्र (everywhere)
MANNER	कथम् (how ?)	यथा (as)	तथा (so)	कथञ्चित् (somehow)
CAUSE	किम् (why ?)	यतः (because)	(ततः)	
CONDITION	—	यदि (if)	तर्हि (then)	
CONCESSION	—	यद्यपि (although)	तथापि (yet)	

Examples

You came when the guests had gone—यदातिथयो गतास्तदा त्वमागच्छः।

Sit down while I fetch water—यावदहं जलमानयामि तावदुपविश।

They stood where the hero fell—यत्र वीरोऽपतत् तत्र तेऽतिष्ठन्।

Virtues adorn the heart as flowers adorn the tree—यथा पुष्पाणि वृक्षं तथा गुणा हृदयं भूषयन्ति।

He does not speak because his friends have left him—यतो मित्राणि तमत्यजन् स न भाषते।

If your mother comes, you should wait upon her—यदि मातागच्छेत् (तर्हि) तां सेवेथाः।

Although I live in the forest, I still remember my friend—यद्यपि वने वसामि तथापि मित्राणि स्मरामि।

129. When an adverb-clause is translated by an indeclinable past participle or by a locative or genitive absolute, the conjunctive and simple adverbs are not translated (*see* LESSON **24**).

130. The **numerals** एक, द्वि, त्रि, चतुर् agree in **gender and case** with the following noun.

The **numerals** from पञ्चन् (five) to नवदशन् (nineteen) are declined alike in the three genders. They agree in **case** with the noun they qualify. Except for षष् (six) and अष्टन् (eight) they are all declined like पञ्चन्

	पञ्चन्	षष्	अष्टन्
Nom.	पञ्च	षट्	अष्ट or अष्टौ
Acc.	पञ्च	षट्	अष्ट or अष्टौ
Instr.	पञ्चभिः	षड्भिः	अष्टभिः or अष्टाभिः
Dat.	पञ्चभ्यः	षड्भ्यः	अष्टभ्यः or अष्टाभ्यः
Abl.	पञ्चभ्यः	षड्भ्य.	अष्टभ्यः or अष्टाभ्यः
Gen.	पञ्चानाम्	षण्णाम्	अष्टानाम्
Loc.	पञ्चसु	षट्सु	अष्टसु or अष्टासु

131, Cardinals and Ordinals from One to Nineteen

Cardinals	*Ordinals*		*Cardinals*	*Ordinals*	
एक	प्रथम	-मा	दशन्	दशम	-मी
द्वि	द्वितीय	-या	एकादशन्	एकादश	-शी
त्रि	तृतीय	-या	द्वादशन्	द्वादश	-शी
चतुर्	चतुर्थ	-र्थी	त्रयोदशन्	त्रयोदश	-शी
	तुरीय	-या	चतुर्दशन्	चतुर्दश	-शी
	तुर्य	-र्या	पञ्चदशन्	पञ्चदश	-शी
पञ्चम्	पञ्चम	-मी	षोडशन्	षोडश	-शी
षष्	षष्ठ	-ष्ठी	सप्तदशन्	सप्तदश	-शी
सप्तन्	सप्तम	-मी	अष्टादशन्	अष्टादश	-शी
अष्टन्	अष्टम	-मी	नवदशन्	नवदश	-शी
नवन्	नवम	-मी			

132. **प्रथम, द्वितीय** and तृतीय are optionally declined like pronouns in the dat., abl., and loc. singular.

All ordinals form their feminine in ई except प्रथम, द्वितीय, तृतीय, तुरीय and तुर्य which form their feminine in आ.

EXERCISE 26

1. Vocabulary

पक्षिन् (पक्षी) *m.* bird
सेना army
सैनिकः soldier
सेनापतिः m. general
आम्रम् mango
रूप्यम् rupee
आणकः anna
वैद्यः doctor

दिनम् day
दिवसः day
सप्ताहः week
मासः month
वर्षम् year
शताब्दम् century
ऋणम् debt

सजल having water
द्वयम् pair
त्रयम् group of three
चतुष्टयम् group of four
क्षुधार्त famished
महिला woman

भुजगः serpent
भुजगी female serpent
अण्डः egg
बुभुक्षित famished
क्षीण lean, emaciated
निष्करुण pitiless
पुरुषः man

श्रोत्रियः learned brahmin	ऋणदातृ money-lender	स्व one's own	हातव्य to be avoided
दीर्घसूत्रता slowness	यमः Yama	तन्द्रा sluggishness	भूतिः *f.* prosperity
प्रभवः origin	प्राणाः (*m.pl.*) life	सहोदरः brother	हृदयम् heart
मत्तः from me	भावसमन्वित wise	भागवतः devotee	बुद्धिः *f.* intelligence
योजनम् eight miles	क्रोशः two miles	बुधः wise man	इह here ; मूल्यम् price
		वस्तव्य to be dwelt in	आलस्यम् laziness

II. Translate the following into English :

अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ (१)

वैद्यराज नमस्तुभ्यं यमराजसहोदर !
यमस्तु हरति प्राणान् वैद्यः प्राणान् धनानि च ॥ (२)

त्यजेत् क्षुधार्ता महिला स्वपुत्रं खादेत् क्षुधार्तां भुजगी स्वमण्डम् ।
बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवन्ति ॥ (३)

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥ (४)

तत्र मित्रं न वस्तव्यं यत्र नास्ति चतुष्टयम् ।
ऋणदाता च वैद्यश्च श्रोत्रियः सजला नदी ॥ (५)

III. Translate the following into **Sanskrit** :

N.B.—The **time** and **distance** *during which* an action lasts are put in the **accusative** :

बहून् मासान् for many months, द्वे योजने for sixteen miles.

The **time** and **distance** *within which* an action is done are put in the **instrumental** :

त्रिभिः सप्ताहैः within three weeks ; एकेन क्रोशेन within two miles.

The **time** *after which* an action is done is put in the *ablative* :

दशभ्यो वर्षेभ्यः after ten years.

The **price** at which a thing is sold or bought is put in the **instrumental** : षड्भी रूप्यैः क्रीतः bought for six rupees.

(1) On the sixth day of the week I sold fruits for 18 rupees (2) In the nineteenth century many great men fought and died

for the country. (3) While all the children are playing, we are able to write poems. (4) For how many rupees did you buy that horse ? (5) After returning from my friend's house I was sick for two weeks and four days. (6) Within 18 miles, we saw only five or six houses. (7) Three sisters and four brothers lived happily for many years. (8) The general told the soldiers to rise and to fight like lions. (9) Do as you are told. (10) There is nothing sweeter than honey, nothing dearer than a friend, nothing lighter than a pure mind (11) The guests are tired for they have walked there krośas.

IV. Conversation between a fruit-seller and a customer.

आम्रम्। आम्रम्।
कीदृशं फलं तवास्ति। आम्राणि पश्यानि।
पश्यतु भवान्। तादृशं फलमद्य कुत्र भवता प्राप्तुं शक्यते ?
मूल्यं कियद् वद।
द्वादशाम्राणि चतुर्भी रूप्यैर्विक्रीयन्ते।
किं वदसि ? चत्वारि रूप्याणि। तावन्मूल्यं दातुमसमर्थोऽस्मि।
साधु। कियत् भवता दातुं शक्यम् ?
द्वादशानां द्वे रूप्याणि।
भवान् मां परिहसितुमिच्छति। येन मूल्येनेतानि फलानि मया क्रीतानि तद् भवतो मूल्याद् भूयः।
भवतु। अहं गच्छामि।
तिष्ठतु भवान्। मम वचनं श्रूयताम्।
तव वचनं श्रोतुं नेच्छामि। अलं कलहेन। चत्वारीति त्वयोक्तम्। द्वे इति मयोक्तम्। द्वादशानां त्रीणि रूप्याणि दातुं युज्यते।
साधु। कियन्ति फलानि यच्छामि।
एकं दीयताम्।

V. Three types of men :

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहिता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारभ्य चोत्तमजना न परित्यजन्ति॥

VERBAL ROOTS WITH THEIR PRINCIPAL PARTS

From the **present tense in the active voice,** the imperfect, imperative and potential active, and the present participle active are derived.

From the **present tense in the passive voice,** the imperfect, imperative and potential passive, and the present participle passive are derived.

From the perfect passive participle, the perfect active participle in क्तवत् is derived.

The indeclinable past participle and the infinitive are given independently.

The present tense active of verbs which do not belong to the first, fourth, sixth and tenth conjugation, is not given, अस् (to be) and कृ (to do) excepted.

Verbal root	Present act.	Present Pass	Past pass. p.	Ind. past p.	Infinitive
अट् to roam (1)	अटति	अट्यते	अटित	अटित्वा	अटितुम्
अर्च् to worship (1)	अर्चति	अर्च्यते	अर्चित	अर्चित्वा	अर्चितुम्
अर्थ् to request (10)	अर्थयते	अर्थ्यते	अर्थित	अर्थयित्वा	अर्थयितुम्
अर्ह् to deserve (1)	अर्हति	अर्ह्यते	अर्हित	अर्हित्वा	अर्हितुम्
अव् to protect (1)	अवति	अव्यते	अवित	अवित्वा	अवितुम्
अस् to be (2)	अस्ति	भूयते	भूत	भूत्वा	भवितुम्
अस् to throw (4)	अस्यति	अस्यते	अस्त	असित्वा	असितुम्
इष् to wish (6)	इच्छति	इष्यते	इष्ट	इष्ट्वा	एष्टुम्
ईक्ष् to see (1)	ईक्षते	ईक्ष्यते	ईक्षित	ईक्षित्वा	ईक्षितुम्
उज्झ् to abandon (6)	उज्झति	उज्झ्यते	उज्झित	उज्झित्वा	उज्झितुम्

Verbal root	Present act.	Present pass.	Past pass p.	Ind. past. p.	Infinitive
उष् to burn (1)	ओषति	उष्यते	उषित	ओषित्वा	ओषितुम्
एध् to grow (1)	एधते	एध्यते	एधित	एधित्वा	एधितुम्
कथ् to tell (10)	कथयति-ते	कथ्यते	कथित	कथयित्वा	कथयितुम्
कम्प् to shake (1)	कम्पते	कम्प्यते	कम्पित	कम्पित्वा	कम्पितुम्
काश् to shine (1)	काशते	काश्यते	काशित	काशित्वा	काशितुम्
कुप् to be angry (4)	कुप्यति	कुप्यते	कुपित	कुपित्वा	कोपितुम्
कुस् to embrace (4)	कुस्यति	कुस्यते	कुसित	कुसित्वा	कोसितुम्
कृ to do (8)	करोति	क्रियते	कृत	कृत्वा	कर्तुम्
कृत् to cut (6)	कृन्तति	कृत्यते	कृत्त	कर्तित्वा	कर्तितुम्
कृष् to draw (1)	कर्षति	कृष्यते	कृष्ट	कृष्ट्वा	कर्ष्टुम्
कृष् to plough (6)	कृषति	कृष्यते	कृष्ट	कृष्ट्वा	कर्ष्टुम्
कॄ to scatter (6)	किरति	कीर्यते	कीर्ण	कीर्त्वा	करितुम्
कल्प् to be fit	कल्पते		क्लृप्त	कल्पित्वा	कल्पितुम्
क्रम् to walk (1, 4)	क्रामति क्राम्यति	क्रम्यते	क्रान्त	क्रान्त्वा	क्रान्तुम्
क्रीड् to play (1)	क्रीडति	क्रीड्यते	क्रीडित	क्रीडित्वा	क्रीडितुम्
क्रुध् to be angry (4)	क्रुध्यति	क्रुध्यते	क्रुद्ध	क्रुद्ध्वा	क्रोद्धुम्
क्रुश् to cry (1)	क्रोशति	क्रुश्यते	क्रुष्ट	क्रुष्ट्वा	क्रोष्टुम्
क्लम् to be tired (1.4)	क्लामति क्लाम्यति	क्लम्यते	क्लान्त	क्लान्त्वा	क्लमितुम्

Verbal root	Present act.	Present pass.	Past pass p.	Ind. past p.	Infinitive
क्लिश् to suffer (4)	क्लिश्यते	क्लिश्यते	क्लिष्ट		क्लेष्टुम्
क्षण् to hurt (8)		क्षण्यते	क्षत		
क्षम् to endure (1,4)	क्षमते क्षाम्यति	क्षम्यते	क्षान्त	क्षमित्वा	क्षमितुम् क्षन्तुम्
क्षल् to wash (10)	क्षालयति	क्षल्यते	क्षालित	क्षालयित्वा	क्षालयितुम्
क्षि to decay (1)	क्षयति	क्षीयते	क्षित क्षीण	क्षित्वा	क्षेतुम्
क्षिप् to throw (6)	क्षिपति	क्षिप्यते	क्षिप्त	क्षिप्त्वा	क्षेप्तुम्
क्षुध् to be hungry (4)	क्षुध्यति	क्षुध्यते	क्षुधित	क्षुधित्वा	क्षोधितुम्
क्षुभ् to tremble (4)	क्षुभ्यति		क्षुब्ध	क्षुभित्वा	क्षोभितुम्
खन् to dig (1)	खनति-ते	खन्यते-खायते	खात	खात्वा-खनित्वा	खनितुम्
खाद् to eat (1)	खादति	खाद्यते	खादित	खादित्वा	खादितुम्
गण् to count (10)	गणयति-ते	गण्यते	गणित	गणयित्वा	गणयितुम्
गद् to say (1)	गदति	गद्यते	गदित	गदित्वा	गदितुम्
गम् to go (1)	गच्छति	गम्यते	गत	गत्वा	गन्तुम्
गर्ह् to blame (1)	गर्हते	गर्ह्यते	गर्हित	गर्हित्वा	गर्हितुम्
गाह् to plunge (1)	गाहते	गाह्यते	गाढ गाहित	गाढ्वा गाहित्वा	गाढुम् गाहितुम्
गुह् to hide (1)	गूहति-ते	गुह्यते	गूढ	गूहित्वा	गूहितुम्
गै to sing (1)	गायति	गीयते	गीत	गीत्वा	गातुम्
ग्रस् to swallow (1)	ग्रसते	ग्रस्यते	ग्रस्त	ग्रसित्वा	ग्रसितुम्
ग्रह् to take (9)		गृह्यते	गृहीत	गृहीत्वा	ग्रहीतुम्

Verbal root	Present act.	Present pass.	Past. pass. p.	Ind. past. p.	Infinitive
ग्लै to fade (1)	ग्लायति	ग्लायते	ग्लान	ग्लात्वा	ग्लातुम्
घुष् to proclaim (10)	घोषयति-ने	घुष्यते	घुषित घोषित	घोषयित्वा	घोषयितुम्
घ्रा to smell (1)	जिघ्रति	घ्रायते	घ्रात घ्राण	जिघ्रित्वा	घ्रातुम्
चर् to move (1)	चरति	चर्यते	चरित	चरित्वा	चरितुम्
चल् to move (1)	चलति	चल्यते	चलित	चलित्वा	चलितुम्
चि to collect (5)		चीयते	चित	चित्वा	चेतुम्
चिन्त् to think (10)	चिन्तयति-ने	चिन्त्यते	चिन्तित	चिन्तयित्वा	चिन्तयितुम्
चुर् to steal (10)	चोरयति-ने	चोर्यते	चोरित	चोरयित्वा	चोरयितुम्
चेष्ट् to try (1)	चेष्टते	चेष्ट्यते	चेष्टित		चेष्टितुम्
छद् to cover (1,10)	छदति-ने		छन्न		
	छादयति-ने	छाद्यते	छादित		
छिद् to cut (7)		छिद्यते	छिन्न	छित्त्वा	छेत्तुम्
जन् to be born (4)	जायते		जात		
जप् to mutter (1)	जपति	जप्यते	जपित	जपित्वा	जपितुम्
जल्प् to prattle (1)	जल्पति	जल्प्यते	जल्पित	जल्पित्वा	जल्पितुम्
जि to conquer (1)	जयति	जीयते	जित	जित्वा	जेतुम्
जीव् to live (1)	जीवति	जीव्यते	जीवित	जीवित्वा	जीवितुम्
ज to grow old (4)	जीर्यति	जीर्यते	जीर्ण	जरित्वा	जरितुम्
ज्ञा to know (9)		ज्ञायते	ज्ञात	ज्ञात्वा	ज्ञातुम्

Verbal root	Present act.	Present pass.	Past pass. p.	Ind. past. p.	Infinitive
ज्वल् to glow (1)	ज्वलति	ज्वल्यते	ज्वलित		
डी to fly (1,4)	डयते डीयते		डीन		डयितुम्
ताड् to beat (10)	ताडयति-ते	ताड्यते	ताडित	ताडयित्वा	ताडयितुम्
तन् to spread (8)		तन्यते तायते	तत	तत्वा	तन्तुम्
तप् to heat (1)	तपति	तप्यते	तप्त	तप्त्वा	तप्तुम्
तुद् to strike (6)	तुदति	तुद्यते	तुन्न	तुत्त्वा	तोदितुम्
तुल् to weigh (10)	तोलयति-ते	तोल्यते	तोलित	तोलयित्वा	तोलयितुम्
तुष् to be pleased (4)	तुष्यति		तुष्ट	तुष्ट्वा	तोष्टुम्
तृप् to be satisfied (4)	तृप्यति		तृप्त	तृप्त्वा	तर्पितुम्
तॄ to cross (1)	तरति	तीर्यते	तीर्ण	तीर्त्वा	तरितुम् तरीतुम्
त्यज् to abandon (1)	त्यजति	त्यज्यते	त्यक्त	त्यक्त्वा	त्यक्तुम्
त्वर् to hasten (1)	त्वरते		त्वरित तूर्ण	त्वरित्वा	त्वरितुम्
दंश् to bite (1)	दशति	दश्यते	दष्ट	दष्ट्वा	दंष्टुम्
दण्ड् to punish (10)	दण्डयति-ते	दण्ड्यते	दण्डित	दण्डयित्वा	दण्डयितुम्
दम् to tame (4)	दाम्यति	दम्यते	दान्त दमित	दान्त्वा दमित्वा	दमितुम्
दह् to burn (1)	दहति	दह्यते	दग्ध	दग्ध्वा	दग्धुम्
दा to give (1)	यच्छति	दीयते	दत्त	दत्त्वा	दातुम्
दिव् to play (4)	दीव्यति	दीव्यते	द्यूत	द्यूत्वा	देवितुम्
दिश् to show (6)	दिशति	दिश्यते	दिष्ट	दिष्ट्वा	देष्टुम्

Verbal root		Present act.	Present pass.	Past pass. p.	Ind. past p.	Infinitive
दृ to honour	(6)	द्रियते		दृत		
दृश् to see	(1)	पश्यति	दृश्यते	दृष्ट	दृष्ट्वा	द्रष्टुम्
द्युत् to shine	(1)	द्योतते		द्युतित	द्युतित्वा	द्योतितुम्
द्रु to melt	(1)	द्रवति	द्रूयते	द्रुत	द्रुत्वा	द्रोतुम्
धा to put	(3)		धीयते	हित		धातुम्
धाव् to run	(1)	धावति	धाव्यते	धावित	धावित्वा	धावितुम्
धृ to hold	(1)	धरति-ने	ध्रियते	धृत	धृत्वा	धर्तुम्
धृ to owe	(10)	धारयति		धारित		
ध्मा to blow	(1)	धमति	धम्यते	ध्मात	ध्मात्वा	ध्मातुम्
ध्यै to meditate	(1)	ध्यायति	ध्यायते	ध्यात	ध्यात्वा	ध्यातुम्
नद् to sound	(1)	नदति	नद्यते	नदित	नदित्वा	नदितुम्
नम् to salute	(1)	नमति	नम्यते	नत	नत्वा	नन्तुम्
नश् to perish	(4)	नश्यति		नष्ट	नष्ट्वा	नष्टुम्
नह् to bind	(4)	नह्यति	नह्यते	नद्ध	नद्ध्वा	नद्धुम्
निन्द् to blame	(1)	निन्दति	निन्द्यते	निन्दित	निन्दित्वा	निन्दितुम्
नी to lead	(1)	नयति	नीयते	नीत	नीत्वा	नेतुम्
नृत् to dance	(4)	नृत्यति	नृत्यते	नृत्त	नर्तित्वा	नर्तितुम्
पच् to cook	(1)	पचति	पच्यते	पक्व	पक्त्वा	पक्तुम्
पठ् to read	(1)	पठति	पठ्यते	पठित	पठित्वा	पठितुम्

Verbal root	Present act.	Present pass.	Past pass. p.	Ind. past. p.	Infinitive
पत् to fall (1)	पतति	पत्यते	पतित	पतित्वा	पतितुम्
पद् to go (4)	पद्यते		पन्न	पत्त्वा	पत्तुम्
पा to drink (1)	पिबति	पीयते	पीत	पीत्वा	पातुम्
पा to protect (2)		पायते	पात		पातुम्
पाल् to protect (10)	पालयति-ते	पाल्यते	पालित	पालयित्वा	पालयितुम्
पीड् to oppress (10)	पीडयति-ते	पीड्यते	पीडित	पीडयित्वा	पीडयितुम्
पुष् to nourish (4)	पुष्यति	पुष्यते	पुष्ट	पुष्ट्वा	पोषितुम्
पूज् to worship (10)	पूजयति	पूज्यते	पूजित	पूजयित्वा	पूजयितुम्
पॄ to fill (3)		पूर्यते	पूर्ण	पूर्त्वा	
प्रच्छ् to ask (6)	पृच्छति	पृच्छ्यते	पृष्ट	पृष्ट्वा	प्रष्टुम्
प्री to please (10)	प्रीणयति ते	प्रीयते	प्रीत	प्रीत्वा	प्रेतुम्
फल् to burst (1)	फलति		फलित	फलित्वा	फलितुम्
बन्ध् to bind (9)		बध्यते	बद्ध	बद्ध्वा	बन्द्धुम्
बाध् to obstruct (1)	बाधते	बाध्यते	बाधित	बाधित्वा	बाधितुम्
बुध् to know (4)	बध्यते	बुध्यते	बुद्ध	बुद्ध्वा	बोद्धुम्
भक्ष् to eat (10)	भक्षयति-ते	भक्ष्यते	भक्षित	भक्षयित्वा	भक्षयितुम्
भज् to divide (1)	भजति-ते	भज्यते	भक्त	भक्त्वा	भक्तुम्
भञ्ज् to break (7)		भज्यते	भग्न	भङ्क्त्वा	भङ्क्तुम्
भाष् to speak (1)	भाषते	भाष्यते	भाषित	भाषित्वा	भाषितुम्

Verbal root	Present act.	Present pass.	Past pass p.	Ind. past p.	Infinitive
भिद् to cleave (7)		भिद्यते	भिन्न	भित्त्वा	भेत्तुम्
भू to become (1)	भवति-ते	भूयते	भूत	भूत्वा	भवितुम
भ्रंश् to fall (4)	भ्रश्यति	भ्रश्यते	भ्रष्ट	भ्रष्ट्वा	भ्रंशितुम
भ्रम् to roam (1,4)	भ्रमति भ्राम्यति	भ्रम्यते	भ्रान्त	भ्रान्त्वा	भ्रमितुम्
मद् to be glad (4)	माद्यति	मद्यते	मत्त	मदित्वा	मदितुम्
मन् to think (4)	मन्यते	मन्यते	मत	मत्वा	मन्तुम्
मन्त्र् to consult (10)	मन्त्रयते	मन्त्र्यते	मन्त्रित	मन्त्रयित्वा	मन्त्रयितुम्
मस्ज् to sink (6)	मज्जति	मज्ज्यते	मग्न	मक्त्वा	
मा to measure (2)		मीयते	मित	मित्वा	मातुम्
मार्ग् to seek (10)	मार्गयति-ते		मार्गित		
मिल् to join (6)	मिलति	मिल्यते	मिलित	मिलित्वा	मेलितुम्
मुच् to loosen (6)	मुञ्चति	मुच्यते	मुक्त	मुक्त्वा	मोक्तुम्
मुद् to rejoice (1)	मोदते		मुदित	मुदित्वा	मोदितुम्
मुह् to faint (4)	मुह्यति	मुह्यते	मुग्ध मूढ	मुग्ध्वा मूढ्वा	मोग्धुम् मोढुम्
मृ to die (6)	म्रियते		मृत	मृत्वा	मर्तुम्
मृश् to ponder (6)	मृशति	मृश्यते	मृष्ट	मृष्ट्वा	मर्ष्टुम्
म्ना to repeat (1)	मनति	म्नायते	म्नात		

Verbal root	Present act.	Present pass.	Past pass p.	Ind. past p.	Infinitive
म्लै to fade (1)	म्लायति		म्लान		
यज् to sacrifice (1)	यजति	इज्यते	इष्ट	इष्ट्वा	यष्टुम्
यत् to attempt (1)	यतते	यत्यते	यतित	यतित्वा	यतितुम्
यम् to restrain (1)	यच्छति	यम्यते	यत	यत्वा	यन्तुम्
याच् to beg (1)	याचते	याच्यते	याचित	याचित्वा	याचितुम्
युज् to join (7)		युज्यते	युक्त	युक्त्वा	योक्तुम्
युध् to fight (4)	युध्यते	युध्यते	युद्ध	युद्ध्वा	योद्धुम्
रक्ष् to protect (1)	रक्षति	रक्ष्यते	रक्षित	रक्षित्वा	रक्षितुम्
रच् to arrange (1)	रचयति-ते	रच्यते	रचित	रचयित्वा	रचयितुम्
रभ् to begin (1)	रभते	रभ्यते	रब्ध	रब्ध्वा	रब्धुम्
रम् to sport (1)	रमते	रम्यते	रत	रत्वा	रन्तुम्
राज् to shine (1)	राजति		राजित	राजित्वा	राजितुम्
रुच् to please (1)	रोचते		रुचित	रुचित्वा	रोचितुम्
रुध् to obstruct (7)		रुध्यते	रुद्ध	रुद्ध्वा	रोद्धुम्
रुह् to grow (1)	रोहति	रुह्यते	रूढ	रूढ्वा	रोढुम्
लङ्घ् to leap (1)	लङ्घति	लंघ्यते	लङ्घित		
लज्ज् to be ashamed (6)	लज्जते	लज्यते	लज्जित		
लभ् to get (1)	लभते	लभ्यते	लब्ध	लब्ध्वा	लब्धुम्

Verbal root		Present act.	Present pass.	Past pass. p	Ind. past. p.	Infinitive
लिख् to write	(6)	लिखति	लिख्यते	लिखित	लिखित्वा	लेखितुम्
लिप् to anoint	(6)	लिम्पति	लिप्यते	लिप्त	लिप्त्वा	लेप्तुम्
ली to stick	(9)		लीयते	लीन	लीत्वा	लेतुम्
लुट् to wallow	(4)	लुट्यति	लुट्यते	लुटित		
लुप् to break	(6)	लुम्पति	लुप्यते	लुप्त	लुप्त्वा	लोप्तुम्
लुभ् to covet	(4)	लुभ्यति	लुभ्यते	लुब्ध	लुब्ध्वा	लोब्धुम्
लू to cut	(9)		लूयते	लून	लवित्वा	लवितुम्
वच् to speak	(2)		उच्यते	उक्त	उक्त्वा	वक्तुम्
वद् to speak	(1)	वदति	उद्यते	उदित	उदित्वा	वदितुम्
वन्द् to salute	(1)	वन्दते	वन्द्यते	वन्दित	वन्दित्वा	वन्दितुम्
वप् to sow	(1)	वपति	उप्यते	उप्त	उप्त्वा	वप्तुम्
वम् to vomit	(1)	वमति	वम्यते	वान्त	वान्त्वा	वमितुम्
वस् to dwell	(1)	वसति	उष्यते	उषित	उषित्वा	वस्तुम्
वह् to carry	(1)	वहति	उह्यते	ऊढ	ऊढ्वा	वोढुम्
विद् to find	(6)	विन्दति	विद्यते	वित्त विन्न	वित्त्वा	वेत्तुम्
विश् to enter	(6)	विशति	विश्यते	विष्ट	विष्ट्वा	वेष्टुम्
वृत् to exist	(1)	वर्तते	वृत्यते	वृत्त	वृत्त्वा	वर्तितुम्
वृध् to increase	(1)	वर्धते	वृध्यते	वृद्ध	वृद्ध्वा	वर्धितुम्
व्यध् to pierce	(4)	विध्यति	विध्यते	विद्ध	विद्ध्वा	व्यद्धुम्

Verbal root	Present act.	Present pass.	Past pass p.	Ind. past p.	Infinitive
व्रज् to go (1)	व्रजति	व्रज्यते	व्रजित	व्रजित्वा	व्रजितुम्
शंस् to praise (1)	शंसति	शस्यते	शस्त	शस्त्वा	शंसितुम्
शक् to be able (5)		शक्यते	शक्त		
शप् to curse (1)	शपति-ते	शप्यते	शप्त	शप्त्वा	शप्तुम्
शम् to stop (4)	शाम्यति	शम्यते	शान्त	शान्त्वा	शमितुम्
शिक्ष् to learn (1)	शिक्षते	शिक्ष्यते	शिक्षित	शिक्षित्वा	शिक्षितुम्
शुच् to grieve (1)	शोचति	शुच्यते	शोचित	शोचित्वा	शोचितुम्
शुष् to dry (4)	शुष्यति	शुष्यते	शुष्क		शोष्टुम्
श्रम् to be tired (4)	श्राम्यति	श्रम्यते	श्रान्त	श्रान्त्वा	श्रमितुम्
श्रि to reach (1)	श्रयति	श्रीयते	श्रित	श्रयित्वा	श्रयितुम्
श्रु to hear (5)		श्रूयते	श्रुत	श्रुत्वा	श्रोतुम्
श्लाघ् to praise (1)	श्लाघते	श्लाघ्यते	श्लाघित		
श्लिष् to embrace (4)	श्लिष्यति	श्लिष्यते	श्लिष्ट		
सद् to sit (1)	सीदति	सद्यते	सन्न	सत्त्वा	सत्तुम्
सह् to bear (1)	सहते	सह्यते	सोढ	सोढ्वा	सोढुम्
सान्त्व् to console (10)	सान्त्वयति-ते	सान्त्व्यते	सान्त्वित	सान्त्वयित्वा	सान्त्वयितुम्
सिच् to sprinkle (6)	सिञ्चति	सिच्यते	सिक्त	सिक्त्वा	सेक्तुम्
सिध् to reach (4)	सिध्यति	सिध्यते	सिद्ध	सेधित्वा	सेधितुम्
सृ to go (1)	सरति	स्रियते	सृत	सृत्वा	सर्तुम्

Verbal root	Present act.	Present pass.	Past pass. p.	Ind. past. p.	Infinitive
सृज् to create (6)	सृजति	सृज्यते	सृष्ट	सृष्ट्वा	स्रष्टुम्
सेव् to serve (1)	सेवते	सेव्यते	सेवित	सेवित्वा	सेवितुम्
स्था to stand (1)	तिष्ठति	स्थीयते	स्थित	स्थित्वा	स्थातुम्
स्निह् to love (4)	स्निह्यति	स्निह्यते	स्निग्ध	स्निग्ध्वा	
स्पन्द् to throb (1)	स्पन्दते	स्पन्द्यते	स्पन्दित		
स्पृश् to touch (6)	स्पृशति	स्पृश्यते	स्पृष्ट	स्पृष्ट्वा	स्प्रष्टुम्
स्पृह् to long for (10)	स्पृहयति-ते	स्पृह्यते	स्पृहित	स्पृहयित्वा	स्पृहयितुम्
स्फुर् to throb (6)	स्फुरति		स्फुरित		
स्मि to smile (1)	स्मयते	स्मीयते	स्मित	स्मित्वा	
स्मृ to remember (1)	स्मरति	स्मर्यते	स्मृत	स्मृत्वा	स्मर्तुम
स्रु to flow (1)	स्रवति	स्रूयते	स्रुत		
स्वप् to sleep (2)		सुप्यते	सुप्त	सुप्त्वा	स्वप्तुम्
स्वाद् to taste (1)	स्वादते	स्वाद्यते	स्वादित		
हन् to kill (2)		हन्यते	हत	हत्वा	हन्तुम्
हस् to laugh (1)	हसति	हस्यते	हसित	हसित्वा	हसितुम्
हा to abandon (3)		हीयते	हीन	हित्वा	हातुम्
हृ to take (1)	हरति	ह्रियते	हृत	हृत्वा	हर्तुम्
ह्वे to call (1)	ह्वयति	ह्वूयते	हूत	हूत्वा	ह्वातुम्

SANSKRIT-ENGLISH GLOSSARY

अ

अग्निः *m.* fire
अग्रम् tip, point
अग्रे in front (+gen.)
अजः goat
अट् (1) (अटति) to roam
अण्डः egg
अत एव therefore
अतिथिः *m.* guest
अत्र here
अदस् that (*see* n. 70)
अद्य today
अधम lowest
अधः below (+gen.)
अधुना now
अनन्तरम् after (+abl.)
अनिलः wind
अनु after, along (+acc.)
अनुकूल favourable
अनुरागः love
अन्तरा between (+acc.)
अन्तरेण without (+acc.)
अन्तिक near
अन्तिम last
अन्ध blind
अन्नम् food
अन्यः-अन्या-अन्यत् other
अन्यथा otherwise
अन्वच् (अन्वङ्-अनूची -अन्वक्) following
अपराधः offence
अपि even
अप्रतिहत unimpaired
अभितः near (+acc.)
अभिधेयम् name
अम्बु water
अम्भस् (अम्भः) *n.* water
अरण्यम् forest
अरिः *m.* enemy
अरुज healthy
अर्च् (1) (अर्चति) to worship
अर्थ् (10) (अर्थयते) to request
अर्थः object, riches
अर्ह (1) (अर्हति) to deserve
अलम् enough (+instr.)
अलिः *m.* bee
अल्प little
अव् (1) (अवति) to protect
अवाच् (०वाङ् ०वाची ०वाक्) southern
अश्रु tear
अश्वः horse
अष्टन् eight (*see n.* 130)
अष्टम (०म. ०मी ०मम्) eighth
अष्टादशन् eighteen
अष्टादश (०शः शी शम्) eighteenth
अस् (अस्ति) to be
अस् (4) (अस्यति) to throw; वि-अस् (व्यस्यति) to scatter
असमर्थ unable
असिः *m.* sword
असीम limitless
असृज् (असृक्) *n.* blood
अस्मद् I (*see* n. 67)
अहिः *m.* serpent
अहित harmful

आ

आ from, up to (+abl.)
आकाशः sky
आकुल disturbed
आगमः arrival
आगमनम् arrival
आचारः conduct
आचार्यः preceptor
आणक: anna
आत्मन् (आत्मा) *m.* self
आत्मश्रेयस् (आत्मश्रेयः) *n.* supreme good
आदेशः order
आद्य first
आप् (5) to obtain
आपद् (आपत्) *f.* adversity
आम्रम् mango
आयुस् (आयुः) *n.* life
आयुष्मत् (०मान् ०मती ०मत्) long lived

आरोग्यम् health
आलस्यम् laziness
आशा hope
आशु quick
आश्रमः hermitage
आश्रयः refuge, support
आसनम् seat
आहारः food
आह्लादः joy

इ

इच्छा wish
इति thus
इदम् this (*see* n. 69)
इन्दुः *m.* moon
इन्द्रियम् sense
इन्धनम् fuel
इयत् (०यान् ०यती ०यत्) so great, so much
इव like
इष् (6) (इच्छति) to wish
इषुः *m.* arrow
इह here

ई

ईक्ष् (1) (ईक्षते) to see ; परि-ईक्ष् (परीक्षते) to examine ; प्रति-ईक्ष् (प्रतीक्षते) to expect
ईदृश (०शः ०शी ०शम्) such
ईश्वरः God, master

उ

उच्चैः loudly
उज्झ् (6) (उज्झति) abandon
उत्तम highest, best
उत्सारणम् driving away
उदच् (०दङ् ०दीची ०दक्) upward
उदधिः *m.* ocean
उदार generous, noble
उद्भिद् (उद्भित्) *m.* plant
उद्यमः effort
उद्यानम् garden
उपरि above (+gen.)
उपानह् (उपानत्) *f.* shoe
उपायः means
उभयतः on both sides (+acc.)
उरस् (उरः) *n.* breast
उरु wide
उष् (1) (ओषति) to burn
उषस् (उषाः) *f.* dawn
उष्ण hot

ऊ

ऊर्जस् (ऊर्जः) *n.* vigour
ऊर्मिः *f.* wave

ऋ

ऋच् (ऋक्) *f.* hymn
ऋणम् debt
ऋणदातृ (ऋणदाता) money-leader
ऋते except (+abl.)
ऋत्विज् (ऋत्विक्) *m.* priest
ऋषिः *m.* seer

ए

एक one (*see* n. 126)
एकदा once upon a time
एकादशन् eleven (*see* n. 130)
एकादश (०शः ०शी ०शम्) eleventh
एतद् this (*see* n. 67)
एतावत् (०वान् ०वती ०वत्) so great, so much
एव just only
एवम् thus

ऐ

ऐरावतः Indra's elephant
ऐश्वर्यम् power, sway

ओ

ओकस् (ओकः) *n.* house
ओघः flood, heap
ओजस् (ओजः) *n.* energy
ओदनः boiled rice
ओष्ठः lip

औ

औषधम् medicine

क

कः who (*see* किम्)
ककुभ् (ककुप्) *f.* direction
कण्ठः neck
कतरः which of two
कथ् (10) (कथयति) to tell
कथम् how
कथञ्चित् somehow
कदा when
कदापि sometimes ; न कदापि never
कनकम् gold
कनिष्ठ youngest
कनीयस् (०यान् ०यसी ०यः) younger
कन्या daughter
कपिः *m.* monkey
कपोतः pigeon
कमलम् lotus
कम्प् (1) (कम्पते) to tremble
करः hand
करिन् (करी) *m.* elephant
कर्ण् (10) (कर्णयति) to hear
आ-कर्ण् (अकर्णयति) to hear, to listen
कर्णः ear
कर्तृ (कर्ता) *m.* doer, master
कर्मन् (कर्म) *n.* work
कलङ्कः spot
कलहः quarrel
कलिः *m.* quarrel
कल्याणम् welfare
कविः *m.* poet
काणः one-eyed
काकः crow
कान्तिः *f.* beauty
कामः desire
कामदुह् (कामधुक्) granting desires
कायः body
कारणम् cause
कार्य to be done
कार्यम् work, business
कालः time
काव्यम् poem
काश् (1) (काशते) to shine ; प्र-काश् (प्र-काशते) to shine
किङ्करः servant
किन्तु but
किम् (कः का किम्) who ? what ? (*see* p. 113) कश्चित् काचित् किञ्चित् कोऽपि कापि किमपि some, a certain
कियत् (०यान् ०यती ०यत्) how great ? how much ?
किशोर (०री) adolescent
कीदृश (०शः ०शी ०शम्) of what kind ?
कुक्कुरः dog
कुतः whence ?
कुत्र where ?
कुप् (4) (कुप्यति) to be angry (+dat.)
कुशल skilful, expert
कुस् (4) (कुस्यति) to embrace
कुसुमम् flower
कूपः well
कृ (8) (करोति) to do to make; अलम् कृ (अलंकरोति) to decorate
कृत् (6) (कृन्तति) to cut
कृतज्ञ grateful
कृतज्ञता gratitude
कृते for the sake of (+gen.)
कृत्रिम artificial
कृपण wretched
कृश lean, emaciated
कृष् (1) (कर्षति) to draw ; (6) (कृषति) to plough
कृष्णः Kṛṣṇa
कृष्ण black
कृष्णाय (कृष्णायते) to make black
कॄ (6)(किरति) to scatter
क्लृप् (1) (कल्पते) to be fit, to conduce
केलिः *f.* jest (+dat.)
कोकिलः cuckoo
कोपः anger
कौन्तेयः son of Kunti

क्रम् (1,4) (क्रामति, क्राम्यति), अति-क्रम् (अतिक्राम्यति) to go beyond, to cross
क्री (9) to buy ; वि-क्री to sell
क्रीड् (1) (क्रीडति) to play
क्रीडा game
क्रुध् (4) (क्रुध्यति) to be angry (+dat.)
क्रोधः anger
क्रुश् (1) (क्रोशति) to cry
क्रोशः cry, shout
क्लम् (1,4) क्लामति, क्लाम्यति) to be tired
क्लिश् (4) (क्लिश्यते) to suffer
क्लेशः pain, trouble
क्व where ?
क्षण् (8) to hurt
क्षणः moment
क्षयः decay, loss
क्षम् (1,4) (क्षमते, क्षाम्यति) to endure. to forgive
क्षमिन् (०मी ०मिणी ०मि) forbearing
क्षल् (10) (क्षालयति) to wash
क्षि (1) (क्षयति) to decay
क्षिप् (6) (क्षिपति) to throw अधि-क्षिप् (अधिक्षिपति) to abuse ; नि-क्षिप् (निक्षिपति) to put down ; सम्-क्षिप् (संक्षिपति) to shorten, to summarize
क्षिप्र fast, quick
क्षीण wasted, lean
क्षुद्र small, mean
क्षुध् (4) (क्षुध्यति) to be hungry
क्षुध् (क्षुत्) *f.* hunger
क्षुधार्त famished
क्षुभ् (4) (क्षुभ्यति) to be agitated
क्षेत्रम् field

ख

खञ्ज lame
खण्ड् (10) (खण्डयति) to break
खण्डः piece, section
खन् (1) (खनति) to dig
खननम् digging
खलु indeed, surely
खाद् (1) (खादति) to eat
खिद् (4) (खिद्यते) to be afflicted, depressed
ख्यात known, famous

ग

गङ्गा Ganges
गजः elephant
गण् (10) (गणयति) to count ; अव-गण् (अवगणयति) to despise
गतिः *f.* course, gait
गन्तृ (०ता ०त्री ०तृ) goer
गन्धः odour, perfume
गम् (1) (गच्चति) to go ; अधि-गम् (अधिगच्छति) to obtain ; अव-गम (अवगच्छति) to know ; आ-गम् (आगच्छति) to come ; उप-गम् (उपगच्छति) to approach प्रति-गम् (प्रतिगच्छति) to return
गरिमन् (गरिमा) *m.* heaviness
गानम् song
गायकः singer
गायिका songstress
गाह् (1) (गाहते) to plunge
गिर् (गीः) *f.*. voice
गिरिः mountain
गुणः virtue, quality
गुणग्राहिन् (०ही ०हिणी ०हि) appreciative
गुणरागिन् (०गी ०गिणी ०गि) loving virtue
गुणवत् (०वान् ०वती ०वत्) virtuous
गुणिन् (०णी ०णिनी ०णि) virtuous
गुरु heavy, honourable
गुरुः *m.* teacher
गुह् (1) (गूहति) to hide
गुहा cave

गृहम् house
गृहिणी housewife
गै (1) (गायति) to sing
गोपालः cowherd, Gopala
गौतमः Gautama
गौर (∘रः ∘री ∘रम्) white, fair
ग्रस् (1) (ग्रसते) to swallow
ग्रह् (9) to seize
ग्रामः village

घ

घटः jar
घुष् (10) (घोषयति) to proclaim
घृतम् ghee
घ्रा (1) (जिघ्रति) to smell

च

च and
चक्रुषस् (∘वान् ∘क्रुषी ∘वत्) having done
चक्रम् wheel
चक्षुस् (चक्षुः) *n.* eye
चञ्चुः *f.* beak
चटकः (∘का) sparrow
चतुर् four (*see* n 126)
चतुर्थ (∘र्थः ∘र्थी ∘र्थम्) fourth
चतुर्दशन् fourteen
चतुर्दश (∘शः शी ∘शम्) fourteenth
चन्द्रः moon
चन्द्रमस् (चन्द्रमाः) *m.* moon
चमूः army
चर् (1) (चरति) to move; अप-चर् (अपचरति) to depart; आ-चर् (आचरति) to perform
चर्मन् (चर्म) *n.* leather
चर्ममय (∘मयः ∘मयी ∘मयम्) leathern
चल् (1) (चलति) to move
चण्डालः (∘ली) outcast
चारु lovely, beautiful
चि (5) to collect, to gather
चित्र surprising
चिन्त् (10) (चिन्तयति) to think
चिन्मय (∘मय ∘मयी ∘मयम्) spiritual
चिरात् after a long time
चुर् (10) (चोरयति) to steal
चेतस् (चेतः) *n.* mind
चेष्ट् (1) (चेष्टते) to try

छ

छद् (10) (छादयति) to cover
छद्मन् (छद्म) *n.* disguise, fraud
छागः goat
छिद् (7) to cut
छिद्रम् hole, crack

ज

जगत् *n.* world
जग्मिवस् (∘वान् ∘मुषी ∘वत्) having gone
जघ्निवस् (∘वान् ∘घ्नुषी ∘वत्) having killed
जन् (4) (जायते) to be born
जनः man, person
जनकः father
जननी mother
जन्मन् (जन्म) *n.* birth
जप् (1) (जपति) to mutter
जरा old age
जलम water
जल्प् (1) (जल्पति) to prattle
जातिः *f.* race, caste
जानु knee
जामातृ (जामाता) *m.* son-in-law
जालम् net
जि (1) (जयति) to conquer; वि-जि (विजयते) to vanquish; परा-जि (पराजयते) to defeat

जिह्वा tongue
जीव् (1) (जीवति) to live
जीवनम् life
जीवितम् life
जेतृ (०ता ०त्री ०तृ) victorious
जॄ (4) (जीर्यति) to grow old
ज्ञा (9) to know
ज्ञानम् knowledge
ज्ञानवत् (०वान् ०वती ०वत्) learned
ज्ञानिन् (०नी ०निनी ०नि) learned
ज्येष्ठ eldest
ज्योतिस् (ज्योतिः) *n.* light
ज्योत्स्ना moonlight
ज्वल् (1) (ज्वलति) to glow

झ

झठिति quickly, at once

ट

टगर squint-eyed
टिप्पनी gloss, comment
टीका commentary

ड

डिम्भः young child
डी (1,4) (डयते, डीयते) to fly

त

तक्रम् butter-milk
तटः slope, shore
तड् (10) (ताडयति) to beat
तडित् *f.* lightning
तन्दुलः uncooked rice
ततः thence, then
तथा so, thus
तद् (सः सा तद्) that (*see* n. 67)
तदा then
तन् (8) to stretch
तनुः *f.* body
तन्द्रा fatigue, sluggishness
तन्द्रालु sleepy, sluggish
तप् (1) (तपति) to burn
तपस् (तपः) *n.* heat, penance
तपस्विन् (०स्वी) ascetic
तमस् (तमः) *n.* darkness
तरुः *m.* tree
तरुण (०णः ०णी ०णम्) youthful
तर्ज् (10) (तर्जयति-ते) to threaten परि-तर्ज् (परितर्जयति) to threaten
तलम् base, foot
तस्थिवस् (०वान् ०स्थुषी ०वत्) having stood
तादृश (०शः शीः ०शम्) such
तारा star
तालु palate
